शाकानाममयुतं फलं रुचिकरं कर्पूरगंगाजलं तांबूलं मन
सा मया विरचितं पूजां गृहाण प्रभोः २ आत्मा त्वं गिरिजा प
ते परिजनः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना नि
द्रा समाधिस्थिता संचारोपि प्रदक्षिणं पशुपतेस्तोत्राणि
सर्वा गिरो यद्यत्कर्म करोमि देव भगवंस्तत्तदाराधनम् ३
इति शंकराचार्यविरचिता मानसिकपूजा शिवायोस्तु



वायुमूर्तये नमः

स्वशांतं निर्मलं शुद्धं सर्वव्यापि निरंजनम् चिद्व्योमानंदगहनं
तेजस्तत्त्वाश्रयं भजेत् ॐ मध्यशालनिविष्टहंसपरमा
योरोमकूपाश्रया प्राणा हृत्स्वविमर्शशक्तिवपुषा सार्थ
त्रिकोणात्मकः तान्मंत्रात्मतया विलोमयनयः स्वेच्छंद
नाप्यः परो देवो सौ विदधातु भैरववपुस्तेजः परं शासनम् ॥
हृदिस्थे पद्माष्टपत्रे विचरति सततं हंस आशाक्रमेण
पूर्वादीन्सर्गनाशे भयसरणगतिं प्राणविज्ञेयचारैः
ऐशानी यावदाशां प्रति निर्वृक शांत स्वान्तलाम्ना क्षितिक्षा
शां

नीरोन्योवायुश्शून्येप्रतिगुणकल्पनायुक्तिभिर्भू
यएव ॥ आकाश ३ वायु: ६ तेज: ९
जल: १८ पृथ्वी ३६ चैवं २५ प्रति
पत्रं २५ श्वासानिचैवमष्टपत्रेषु ३६
दिनेदिनेत्रीणिप्रक्रमानिस्युरात्रिदिनेचैवं
२१६ ॥ ओं व्योमेंदौरसनार्णकर्णिकमचां
द्वंद्वैःस्फुरत्केसरे वर्णान्तर्गतपंचवर्गयुग
लार्णादित्रिवर्गक्रमात् आशास्वग्निषुलां
तलांगालियुजाह्नोणीपरेणावृतं वर्णाब्जं
शिरसिस्थितंविषगदप्रध्वंसिमृत्युंजयम्
मूलाधारध्वनिंश्रुत्वाप्रबुद्धांशाश्वतींकुंडलीम्
ज्वलत्पावकसंकाशांसूक्ष्मतेजःस्वरूपिणीं
मूलाधाराच्छिरःपद्मंस्पृशंतीविद्युदाकृतिं
तयास्पृष्टशिरःपद्मादमृतौघस्वरूपिणः नि
र्गतान्मातृकावर्णान्सुषुम्णावर्त्मनातनुं
व्यापयित्वास्थितान्सर्वानेवंध्यात्वाप्रविन्य
सेत् ॥ इतिध्यात्वामातृकान्न्यसेत्

३

ॐ नमः शिवाय ॥ यच्चाप्युक्तं तदिङ्मात्रकाश्चित्पूर्वापरा
दिका प्रत्ययोहि न तस्याः स्या उपा
धिः पूर्वतादिष्विति चेन्नन्तु तद्दिशा उपाधिमात्रेण तु
प्यावैचित्र्यायकथं भवेत् ॥ स्वविमर्शप्रकाशोयं मूर्तीभा
सनभागतः पूर्वादिदिग्विभागाख्यं वैचित्र्यं तेनेखलु
मेरुः तत्र यच्चात्प्रकाशेन सदा स्वीकरणेत्तमम् तदे
वोर्ध्वप्रकाशत्वमस्य पूर्णायोगमधः पुनः ॥ प्र
काशानामधस्ततो मुख्यवः किंचित्प्रकाशयो
ग्यस्य संमुखं प्रसरन्परः पराङ्मुखेन तन्मध्यादितिदि
क्षूर्ध्वयमागतम् प्रकाशसंमुखं यस्तु गृहीत्वोत्तिष्ठक
राष्ट्रिमकाः यत्रति त्विलनप्रकाशस्यानुकू
ला[illegible] दक्षिणस्य परः सव्यं वाममित्युपदिश्यते त
त्प्रकाशनमेवेन्दुस्पर्शसौम्यं तदेवाहि एवमाशाच
तुष्केस्मिन्मध्यविश्रान्तियोगतः चतुष्कमन्यतेना
शोदिशान्तदधिष्ठिताः एवं प्रकाशमात्रेस्मिन्व
स्तदे परमे शिवे दिग्विभागः स्थितो लोके शास्त्रेपि च
तथोच्यते क्रमात्सदाशिवाधीशः पंचमं त्रतनुर्य
तः ईशस्याघोरवामाख्यसद्योजातादिनादिशः
ईशादूर्ध्वप्रकाशत्वात्पूर्ववक्त्रं प्रसारियत् अघोरो द
क्षिणाख्यं तु वामो वामस्तु सौम्यकः पराङ्मुखेन पा
तालवक्त्रमधरम स
मश्च पश्चिमः परिभाष्यते पातालवक्त्रमधरम प्र
काशात्मा स्थितेः स्वेमहदङ्क्रितलभुवोनिवक्त्रा
एपस्तूपहि मुख्यत्वेनत्वमेवोर्ध्वप्रकाशमयस्वच्छ
ते तदेवमुख्येनोधस्तादप्रकाशयतः स्फुटम् मध्य

नु यत्प्रकाशं तत्र प्रकाशेन चेतरत् प्रकाशत्वाद्विरूप
मानमतोस्मिन्दिक्चतुष्टयम् पंचेमं त्वनुवीप्य इ
त्यविरुद्धदिगीश्वरः ततोपीशस्य प्राहन्तो विमर्शलो
तथास्थितः ऊर्ध्वाभिव्यक्तायोग्यत्वाद्विश्वोर्ध्वानुत्र
पंचमम् न वक्त्रं नो भेदमयोस्त्यिति दृष्टि प्रभूयतः
दिग्विभागस्तु तज्ज्ञोक्तिवदनानां चतुष्टयात् पंचमा
स्यत्तु जिन्वेनो परिमितनिजात्मको ततो ब्रह्माण्डमध्य
पिशानशक्तिर्विभोरवि: दिग्विभागं कुरुते प्रकाशयं
घ न्तृत्तिमान् तथाहि विभुवच्योगे यतः पूर्वं प्रत्युते ९९
तत्पूर्वं यत्र तु च्छाया तत्पश्चिममुदाहृतं तस्मिन्नुजि
गमिषोरस्य यत्सव्यं तत्तु दक्षिणम् तत्रैशावेऽ ते
जोभिर्भीतिजाज्वल्यमानवत् तत्पुरोवर्तिवामन्तु त
ज्ज्ञामात्वे चितमनाक् तत एव हि सौम्यंत त्वचापि स्व
प्रकाशकम् यत्रासावस्तमभ्येति तत्पश्चिममिति स्थि
तिः तत्रैव पश्चिमे येषां प्राक्प्रकाशावलोकनम् त
देव पूर्वमेतेषां यथा ध्वनिनिरूपितम्


स्यानुसारश्च नैतं च दिग्विभागं सदाशिवः अधितिष्ठ
त्यार्कमिव सविचित्रवपुर्यतः सौम्या अपि दिशः स्वे
शाः शाक्ता चाशाधिशेरते तेहि प्रकाशशान्तः शाः
प्रकाशानुविधायिनः प्रकाशस्य यदैश्वर्यं सहंजो
यत्तु तन्महः सोभिहन्त्वभीमत्वे यमोरक्तस्तु नि
१ मा प्रकाशावरुणस्त्वं चोचत्या ह्यापुरुच्यते
भावसंचययोगेन वित्तेशस्तालये विभुः अदृष्टवि
ग्रहो नंतत्र सोर्ध्वं दहको विभुः प्रकाशस्यैवधर्मो

शालोकमासेनकीर्तिताः इहकिलद्दकर्मे
ष्टाःशिवउक्तोल्लासस्तुवेद्यखंडलके स्थूलेसूक्ष्मेक्रम
शःसकलप्रलयाकलोभवतः शुद्धाएवेतुसृष्टाज्ञाना
कलतांगताःप्रबुद्धास्तु प्रविभिन्नकतिपयात्मकवेद्य
विदोमंत्रउच्यन्ते भिन्नेत्वखिलेवेद्येमंत्रेशास्तन्महे
शास्तु भिन्नाभिन्नेउदियान्स्वशिवांतोध्वादितःप्रेते ता
एवगलितभेदप्रसरेक्रमशोविकासमायांत्यः अन्योन्या
संकीर्णास्वरान्नयगलितभेदिकास्तुततःपश्यन्त्यौन्मन
सी

तथाहिवेद्यतानामभावस्यैवनिजंवपुः चैत्रेणवेद्यंवेद्मी
तिकिंह्यत्रप्रतिभासताम् ननुचैत्रीयविज्ञानमात्रेम
त्रप्रकाशते वेद्यतात्वस्तुनोधर्मोभातिभावस्यनीलव
त् वेद्यताचस्वभावेनधर्मोभावस्यचेत्ततः सर्वान्प्रत्ये
ववेद्यःस्याद्दृष्टनीलादिधर्मवत् अथवेदकसंवित्ति
वलाद्वेद्यत्वधर्मभाक् भावस्तथापिदोषोसौउविद
हूनवद्ध्रुववत् वेद्यताख्यस्ययोधर्मस्सावेद्यस्यस्त्वत्वप्र
ष्यवत् वेद्यस्त्वेदस्मिन्नत्रापिवेद्यतेत्यनवस्थितिः न
तोनकिंचिद्वेद्यंस्यान्मूर्छितंतुजगद्भवेत् ननुविज्ञातु
पाःस्वरूपापहृतंवपुरुच्यताम् भावस्यार्थप्रकाशात्मा
यथाज्ञानमिदंत्वसत् एकविज्ञानवेद्यत्वेनैकविज्ञा
न्तवेद्यता तस्मान्नवेद्यतानामभावधर्मोलिकस्वन
भावस्यवेद्यतास्यैवसंविदोयःपरिग्रहः अर्थग्रहण
रूपंहि यत्रविज्ञानमात्मनि समवैतिप्रकाशार्थ
स्तप्रत्येषैववेद्यता अत्रब्रूमःपदार्थानां नधर्मोयदि
वेद्यता अवेद्याएवतेसंस्युर्ज्ञानेसत्यपिवर्णिते य

प्याहिपृथुबुध्नादिरूपेऽजृंभमाणस्सत्यपि अतदात्मायं येनेने
तिपृथुबुध्नादिरूपताम् + तस्मात्प्रकाश एवायं पूर्वो
क्तः परमः शिवः + यथा सत्यविज्ञाने विज्ञातृसमवा
यिनि अवेद्यधर्मकाभावाः कथं वेद्यत्वमाप्नुयुः + ॥
२ यथा यथा प्रकाशेत नतत्रावबद्धः स्फुरम् एवं चनील
तानामयथाकाचित्प्रकाशते तद्वच्चकालिवेद्यत्वं ॥
॥ शुष्टुगं फलं प्रकरणार्थस्य संसिद्धेति द्वयेनतः
क्षिपन्नेतोरत्तितेच संधानं चापितन्मिथः ॥ ॥

ॐ विशिष्टकरणस्य न स्थितिसमाधिसंभावना विभावितता या
यदाकमपि गोधमुल्लासयेत् नसा तवसदोदितास्वरसवाहि
नी या चित्तर्यतस्त्वित यस्मिन्निधा स्फुरमिहाविसंवेद्यते ॥ यदा
तु विगतेंधनः स्ववशवर्तितां संश्रयत्र शत्रिमसमुल्लसत्यु
ककंपवाष्पानुगः शरीरनिरपेक्षतां स्फुटमुपाददानस्थितः स्व
यं ज्वलतिति बुध्यते युगपदेव गोधानलः ॥ तदेतदवदेवितद्व
त्युरूपां श्रयैर्वर्जितं महेशमवबुध्यते विवशपाशसंदोभक
मित्यादि ॥ सर्वे सर्वगतत्वेन विज्ञाते परमेश्वरे अंतर्बहिर्नसा
वस्थानयस्याभासते विभुः ॥ यएषविततस्फुरद्विविधभा
वचक्रात्मकः परस्परविभेदवान्विषयतामुपागच्छति य
देकमयभावनावशात एत्य भेदान्वयं स शंभुरशिवापहो
जयति गोधभासोनिधिः ॥ तवनकाकिलनस्तुतिरं वि
के सकलशब्दमयी किलतेतनुः निखिलमूर्तिषु मेभव
दन्वयो मनसिजासु बहिष्प्रसरासु च। इतिविचिंत्यशि
व शामिताशिवे जगति जातमयत्नवशादिदम् स्तुतिज
पार्चनचिंतनवर्जिता नखलु काचनकालकलास्ति मे ॥



ॐ संवर्ताग्नितडित्प्रतप्तकनकप्रस्पर्धितेजोरुणं गंभीरस्मितनिः
सृतोग्रदशनोप्रोद्भासितोर्ध्वाधरम् अर्धेन्दुद्युतिलोलपिंगल
जटाभारप्रबद्धोरगं वंदे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलि
नः १ कालाभ्रभ्रमरांजनद्युतिनिभं व्यावृत्तपिंगेक्षणं का
लेन्दूदयनिःसृतोग्रदशनं प्रोज्झिन्नदंष्ट्रांकुरम् सर्पप्रोत
कपालशुक्तिसकलंव्याकीर्णसच्छेखरं वंदे दक्षिणमीश्व
रस्य कुटिलभ्रूभंगरौद्रं मुखम् २ प्रालेयामलमिंदुकुं
दधवलगोक्षीरफेनप्रभं भस्माभ्यंगमनंगदेहदहनं
ज्वालावलीलोचनम् ब्रह्मेन्द्रादिमरुद्गणैःस्तुतिपरैरभ्यर्चि

तंयोगिभिर्वंदितंसकलंकलंकरहितंस्थाणोर्मुखंपश्चिमम् ३
रक्तंऊँऊमपिंगलंसतिलकंव्यापांडुगंडस्थलंभ्रूविक्षेपकटा
क्षवीक्षणलसत्संसक्तकर्णोत्पलम् स्निग्धंबिंबफलाध
रप्रहसितंनीलालकालंकृतंवंदेपूर्णशशांकमंडलनिभं
वक्त्रंहरस्योत्तरम् ४ अव्यक्तंव्यक्तगुणोत्तरंचवरदंषट्त्रिंश
तत्त्वात्मकंतस्मादुत्तरतत्त्वमक्षय्यमितिध्येयंसदायोगिभिः
वंदेतामसवर्जितंमनसासूक्ष्मातिसूक्ष्मंपरंशांतंपंचममीश्व
रस्यवदनंखंव्यापितेजोमयम् ५ यद्देव्यासुरकरैकन्यका
करधृतैःसंवीजितंचामरैःपन्नागोद्भजनागजातिरजलेरा
पुरीविषैश्चार्चितं ज्वालामालासहस्रदीप्तिकिरणंकालाग्नि
रुद्रंमहत्संहारकरंनमामिमनसापातालसंस्थंमुखे
म् ६ अमुष्यमंत्रस्यचवाचकत्वादगस्तिरामादिभिःपूज
नत्वात् पारस्तत्त्वस्यचचिंतनत्वान्नमःशिवायेतिममा
स्तिमज्जपः ७ इतिश्रीशिवस्तोत्रंसंपूर्णम् ॥ ॥

[illegible]

ॐ देवानां देवमीशानमादिमध्यान्तवर्जितम् भावगम्यं नमस्कृत्य
प्रपुच्छ षडाननः स्कन्दः शिवं शशिकलाक्रान्तमणिमौलिविराजितं
शिवाख्यं कवचं नाथ मम वक्तव्यमञ्जसा श्रीईश्वर उवाच ॥
साधुसाधु महाप्राज्ञ बुद्धिमान शिव एव च यत्त्वयेदं कृतं प्रश्नं
तत्सुरा विष्णुना कृतम् कथितं न मया तस्य रहस्यत्वाद्विशेषतः
तव स्नेहात्प्रवक्ष्यामि स्कन्द एवैकमनाः स्थितः शिवाख्यं कवचं
पुण्यं गुह्यं पापप्रणाशनम् सर्वमंगलमंगल्यं सर्वैश्वर्यप्रदाय
कम् सर्वलोकरं चैव सर्वार्तिविनिसूदनम् सर्वदुःखप्रशमनं
सर्वकामफलप्रदम् ॐ ईशो मामग्रतः पातु चेश्वरः पातु पृष्ठतः
ईशानः पातु शिरसि मूर्ध्नि तत्पुरुषस्तथा अघोरो दक्षिणे कर्णे
वामदेवस्तथापरे सद्योजातः शिखायां तु नेत्रयोः पातु शंकरः क
पर्दी च भ्रुवौ पातु पद्माणि नीललोहितः चक्षुषी देवदेवेश
ललाटं वृषभध्वजः व्योमकेशो हनुं पातु कपाली वामके हनु
म् कपोलौ पातु मे रुद्रो नासान्ते च महेश्वरः अधरौ पातु मे शंभु
श्चिबुके गिरिशस्तथा दंतमूले भवः पातु दंताग्रे श्वेतकांतकः व
क्त्रं रक्षतु सर्वस्तोलंपिकायां त्र्यंबकः कंठं रक्षतु मे नीलकंठो वृष
भवाहनः भुजयोर्जयवान्पातु भुजाग्रे चंद्रशेखरः अंगुष्ठां
गुलीः पातु वक्षो दक्षाध्वरांतकः उरःस्थले हरः पातु नखांस्त्रि
पुरांतकः त्रिशूले दक्षिणे पार्श्वे वामपार्श्वे पिनाकधृत् सदा
शिवः पातु हृदि स्तनयोः पार्वतीपतिः उदरे पातु मे शंभुर्हि
रेताः प्रतापवान् पादांगुष्ठांगुलीः पातु स्थाणुस्थाणुर्नखानि च
पादद्वयतलं पातु वामे च परमेश्वरः गुल्फौ रक्षतु मे भर्गो जंघे
मे त्र्यात्रिलोचनः जानुद्वयं पशुपतिरूरुयुग्मं जयस्तथा गुदं
रक्षतु मे भीमः कटिं मे धूर्जटिस्तथा उग्रो रक्षतु मे मेढ्रं नाभिं ना
रायणप्रियः भूतेशः पातु मे लोम्नि शर्वः सर्वांगसंधिषु ॐकारः
परिपूर्णत्वात्त्वचि सर्वत्र रक्षतु नकारो रुधिरं पातु मकारो मांस

संचयम् शिकारःपातुमेमेदो वकारःपातुमेस्थिषु यकारःपा
तुमेमज्जाशुक्रं पातुषडात्मकः एवंषडक्षरमयं सर्वधर्मार्थ
संचयम् देहंममेतियो ध्यायेत्सोहमेवनसंशयः यदिदं
कवचंगुह्यं पृष्टंतत्तेमयाधुना शिवेत्यक्षरयुग्मात्वंकव
चंसमुदाहृतम् दिनंवायदिवामासं वत्सरं वात्रिवत्सरम् द
शसंवत्सरं वापित्रिसंध्यं यःपठेन्नरः तस्यपुण्यफलंयत्तुव
दाम्यहंशृणुतत्परः दिनद्वयेमासकृतं मासाद्वर्षशतंतथा
वर्षाज्जन्मकृतंयत्तु त्रिवर्षात्सप्तजन्मजम् तस्यपूर्वकृतं
यत्पातकंचोपपातकम् तत्सर्वंविलयंयाति रविणा
तिमिरंयथा दशाब्दं यःपठेन्नित्यं त्रिकालंध्यानपूर्वकम्
अनेनैवशरीरेणजीवन्मुक्तोभवत्यसौ अणिमादिगुणा
न्प्राप्य विचरेत्स्वेच्छयाततः सर्वादिशिवराग्रेषु सर्वसा
गरवारिषु सर्वद्वीपेषु सर्वत्र विचरेद्वायुवाहनः अन
लादिवरेण्या त्रिभुवनानि चतुर्दश ममलोकेषु सर्वत्र
विष्णुलोकेतथैवच ब्रह्मलोकेचरमते सर्वत्राप्यनिवारि
तः इंद्राग्नियमनैर्ऋत्यजलेशपवनादिभिः धनदेशा
नपर्यंतैर्लोकपालैः सपाल्यते मरीचिरत्र्यंगिरसौ पुल
स्त्यःपुलहःक्रतुः दक्षकश्यपभृग्वाद्यान्यृषिभिश्चपाल्य
ते दानवैश्चासुरैर्दैत्यैःसिद्धगंधर्वकिन्नरैः यक्षैर्विद्याधरैर्ना
गैरप्सरोभिःसपाल्यते ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चैवा
न्त्यजन्मभिः पशुपक्षिमृगैर्व्यालैः पूज्यते सर्वजंतुभिः
अथकिंबहुनावत्स नवेद्यपयथाह्यहम् मयाचविष्णुनाचै
वविश्वकर्त्रासपाल्यते पार्वत्यासमदालक्ष्म्यासरस्वत्यादि
मातृभिः गणेश्वरादियोगीन्द्रैर्योगिनीभ्यश्चपाल्यते स
वानाह्मवराजोयंतस्मात्वंभजसर्वदा ॥ इतिश्रीविष्णु
पुराणेकेश्रीशिवकवचंसमाप्तम् हरदासपाठकस्य

स+

ॐश्रीसद्गुरुंचिद्घनमद्वितीयंशांतंस्वसंवेद्यमपारसारं नमामिस्वानंदर
यस्वरूपं विज्ञानदंशिवंचसेव्यम् ॥
अथप्रणवस्यपंचमात्राया

बिंदुआकाशरूपं
तस्यदेवतापरम
शिवंचिदाकाशः
स्वसंवेद्य

अयमात्माब्रह्म
अर्धचंद्रं वायुरूपं महेश्वरी देवता
चित् शक्तिः महामाया शरीरः महा
प्रलयअवस्था त्रिगुणात्मकं
अथर्वणवेदो

प्रत्यगात्मनः महाकार
स्फूर्तिमात्रं शरीरं तुरी
यअवस्था ब्रह्मानंद
भोगं

मकारं तेजोरूपं तस्यदेवताई
श्वरः तस्यशरीरं माया

तस्यअ वस्था
प्रलयः
तमोगु णं सा
मवेदस्य तत्त्वमसि महा
वाक्यं

अज्ञात्मनः कारणशरीरं सुषुप्ता
वस्था अनुक्तभोग किंप्रज्ञादि
नाद्रूपं अहं यत्प्रकर्षेण अज्ञः
प्राज्ञ अथ चैतन्याभासयो ते
चितं अज्ञानं तत्कारणं चाप्याह
ति प्राज्ञे स्वरशरीरं अथसुषुप्ता
वस्था इति ज्ञानानां उपसंहारः अ
नुक्तभोगः अथ अहमपि न वेदो
कि

उकारं अप्रूपं तस्यदेवता
विष्णु तस्यशरीरं हिरण्यग
र्भ इच्छाशक्तिः
सतोगुण
यजुर्वेद
अहंब्रह्मा
स्मीति स्थि
त्यावस्था

तैजसात्मनः सूक्ष्मशरीरं
स्वप्नावस्था सूक्ष्मोभोगः

अकारपृथि
वीरूपंतस्य
देवताब्रह्मा
तस्यशरीरं
विराट्क्रिया
शक्तिः इत्याव
स्थारजोगुण ऋ
ग्वेदो प्रज्ञानमानंदब्रह्म

विश्वात्मनः स्थूलशरीरं
जाग्रदवस्था स्थूलभोगः

दशेंद्रियसमन्वितं
श्रोत्रस्य देवता दिक् विषय शब्दः
त्वक् अस्य देवता वायुः विषय स्पर्शः
चक्षुषा देवता सूर्यो विषय रूपः
जिह्वाया देवता वरुणः विषय रसः
घ्राणस्य देवता पृथ्वी विषय गंधः

प्राणस्य	अपानस्य	व्यानस्य	उदानस्य	समानस्य
देवताई	देवताअ	देवमान	देवताम	देवतावा
शानवि	घोरसिन	तुरुषवि	द्योजात	मदेवत
षयश्वासो	पीतादीनां	षयबल	नस्यविष	स्यविषय
च्छ्वासंक	अधोआक	साध्यउ	यदेहोत्क	अन्नादिर
रोति	र्षयति	द्यामकरोति	र्षणं	सनाडीषु
				समस्था
				पयति

मनः	बुद्धिः	चित्त	अहंकारः
देवता	देवता	देवता	देवतारु
चंद्रमः	ब्रह्माबृ	सूर्यो	द्रः विष
विषय	हस्पतिः	विषय	यअभि
संकल्प	विषयनि	चिंतन	मानः
	श्चयः		

वाक्पाणि आदि इंद्रियाणां अग्न्यादि देवता वक्तव्यादि विषयः

प्राण	श्रोत्र	वाक्					
अपान	त्वक्	पाणि	पृथ्वी	आपः	तेजः	वायुः	नभः
व्यान	चक्षु	पाद	पंचगुण	पंचगु॰	पंचगु॰	पंगु॰	पं॰गु॰
उदान	जिह्वा	पायु	अस्थि	वीर्य	तृष्णा	धाव	राग
समान	घ्राण	उपस्थ	मांस	शोणितं	क्षुधा	नव	द्वेष
			नाडी	पित्त	निद्रा	लनं	लज्जा
			त्वचा	मज्जा	क्रांत	उत्क्षे॰	भय
			रोम	लाल	आलस्यं	लनं सकोच प्रसारण	मोह

पंचीकृतपंचभौतिकं आका
शवायुतेजःआपःपृथ्वीअ
षपंचानांभूतानां एकैकं
द्विधाविभज्य पुनरेकैकं भा
१ गंचतुर्धाविभज्यस्वार्धभागंविहाय
इतरेषुसंयोजनीयंपंचीकरणंभवति ॥

ॐ स्वस्ति प्रजाभ्यः श्रीगुरवे नमः ॥ ॐ एकस्यं स
प्तनालं नवनवकलिकं द्वादशार्धार्धमूलमष्टात्रिं
शत्फलाभं प्रकृतिसरसिजं षट्सुषट्सुप्रभूतम्
पंचाशत्केसराढ्यं विषयविकसितं तच्छरीरारविंद
मेकं तत्सप्त भित्वा चरति मधुकरो द्वादशान्तं शिवां
तात् अस्यार्थः मधुशब्देन विषयागंधादयः ता
न् करोति भुंक्ते संगृह्णाति वेति मधुकरो जीवः प्रा
णसंज्ञः शरीरमेवारविंदं संचरति किंयंतमध्वानं द्वा
दशान्तं शिवांतात् शिवांतान्मूलाधाराद्वादशान्तं ना
सामार्गेण बहिर्द्वादशांगुलं तावन्निस्सरति पुनस्त
नैव क्रमेण द्वादशान्तात् शिवान्तं प्रविशति किं कृत्वा
सप्त चक्राणि त्वचो वा भित्वा तदुक्तं व्याप्नोति सर्वतो वा
पुर्येन देहः प्रवर्तते देहेपि मूलाधारात् समुच्चाति
समीरणः नासाभ्यामसलमभ्येति प्राणतो द्विषडंगु
लं शरीरारविंदं कीदृशं एकस्य एकस्यां कुंडलिन्या
मेव भूमिकायां स्थितं तदुक्तं आधारः सर्वभूतानां स्फु
रंती विद्युदाकृतिः शंखावर्तक्रमा देवी सर्वमावृत्य ति
ष्ठतीति कुंडलिनी वर्णने तथा सप्तसंख्यानां नालानां
श्रीगांधारीप्रभृतयः एव दंडा यस्य तत् तदुक्तं उभया
त्मिकयाः पार्श्वस्था नाडी दीर्घा भवेदृजुः अवाङ्मुखो सा
तस्याश्च भवेत्पद्मद्वयाह्वयम् नाशास्तत्संधिवर्जा
स्तु सप्तान्यानाड्यामताः तत्र या प्रथमा नाडी सा सु
षुम्नेति कथ्यते वामे इडेति साज्ञेया दक्षिणे पिंगला
स्मृता अन्याधमन्यः सप्तोक्ता गांधारी हस्तिजिह्वि
का पूषा चालंबुसा चैव यशस्विन्यपि शंखिनी कु

शिवायाः ऊर्ध्वरेतो मूलाधारः तस्मा
रभ्य द्वादशान्तं यावत् शिवां कुंडलिनी

हूरितिचविद्वद्भिःकथितास्सप्तनाडयः तथा षट्सु
शिरसिपादयोः करयोरंतरादौचेतिमुख्यांगेषट्
केनवनव प्रत्येकंनवनवसंख्याकाः कलिकाः प्र
त्यंगानियस्मात् तदुक्तं जंतुःषडंगीपूर्वस्मात्
शिरःपादौकरावपि अंतरादिश्चेतिपुनःषडंगेषु
प्रवर्तते श्रोत्रनासास्यकर्णभ्रूकपोलचिबुका
दिकम् प्रकोष्ठकूर्परांसाच्यकटिरूरुप्रपदादिकम्
उरःउदितलनाच्यचननःसर्वांगवान्विभुः इत्यादि
तथा द्वादशाधोर्ध्वाः तिस्रोनाड्यः सुषुम्णेडा
पिंगलाः मूलयस्मात् तदुक्तंप्रागेव तथा अ
ष्टात्रिंशद्भिः फलैः प्रकृतिपरिणामभूतैः त्रिभिः
सत्वरजस्तमोभिर्गुणैः त्रिभिर्दोषैर्वातपित्तकफैः
पंचभिर्भूतैः पृथिव्यप्तेजोवाय्वाकाशैः सप्तभिर्धा
तुभिः रसासृङ्मांसमेदोस्थिमज्जाशुक्रैः पंचभिः
गुणैर्गंधादिभिः चक्षुराद्यैः पंचभिर्ज्ञानेंद्रियैः द
र्शनादिभिः पंचबुद्धिभिः पादादिभिः पंचकर्मेंद्रि
यैः आभंशोभमानं तथोक्तं बहुनाकिंपरंब्रसः
सान्निध्यात्सविजृंभिता प्रकृतिर्गुणभिन्नासा त्रि
दोषात्मामहीयसी पंचभूतमयीसप्तधातुभि
न्नाचभौतिकैः पंचभिश्चगुणैर्युक्ता पंचेंद्रियवि
चारिणी पंचेंद्रियगताभूयापंचबुद्धिप्रभाविनी
पंचकर्मेंद्रियगतापंचतादौप्रवर्तते तथा प्रकृ
तिर्योनिरवसरस्तस्मात् जातंस्पष्टम् तथाष
ट्सुऊर्मिषुप्रभूतताद्रूप्येनवर्तमानं षड्भयः
प्राणबुद्धिदेहधर्मेषुसंस्थिताः बुभुक्षाचपि

२

ॐ कृत्वोङ्कारप्रदीपं मृगय गृहपतिं सूक्ष्मना
द्यान्तरस्थं संयम्य द्वारवाहं पवनपटुतरं
नायकं चेन्द्रियाणां वाग्जालैः कस्य हेतो
विनटयसि भवं दृश्यते नैव किंञ्चि देहस्थं
पश्यपश्यं भ्रमसि किमपरे शास्त्रजालान्ध-
कारे ॥ आकाशः शिवान्नेजगदखिल-
मिदं यद्विधाधः स्वरूपं मूर्तिर्यस्य स्फुरन्ती
प्रसरति सततं स्वेच्छया पापवर्जम् यद्वा-
केयर्थी न वाचि त्रिमलभवजपाशाय का
यस्तत्त्वसंभामं स्वस्वरूपं पशुपतिमहिता
चार्यवर्यं नमामि ॥ सेवध्वं विबुधा सम-
न्यकारिं मालिषकष्टेष्कृते यस्मात्त्वप
रत्रच त्रिजगति त्राता स एकः शिवः आया
ते नियतेर्वशाद विरले कालाकरालाङ्गय
उत्रव्याकरं ह्यन्तकं वालहः उत्रापि कामा
श्रमः ॥ ॥ ॥

ञ्छुभम् मध्यवाहेनविषयास्वादंकरोतिस्वभोगा
र्थंभोक्तृत्वेनेतिजीवः प्राणसमष्टिः शरीरमे
वारविंदंसञ्चरति कियन्तमध्वानम् शिवान्ता
त् शिवायाःशक्तेरन्तोमूलाधारस्तस्मादारभ्य
द्वादशान्तंयावत् यतःशिवान्तादारभ्यद्वाद
शान्तंयावत्प्राणरथमधिरुह्यारोहति पुन
स्तेनैवक्रमेणद्वादशान्ताच्छिवान्तमवरोह
ति किंकृत्वा मूलाधारस्वाधिष्ठानादीनि
भित्वाविघट्य शरीरारविन्दंकेदृशमे।
कस्यमेकसांकुण्डलिन्यामेवाधारशक्तौ
भूमिकायांस्थितम् अथवा नवोनूतनः
सततविकासेन नवनवसंख्याकानिद्वार
रूपवकल्पितानियस्यतत् ॥ अथवा अ
ष्टात्रिंशत्कलाभमितिपाठे अष्टात्रिंशत्क
लाभिः सूर्यसमाग्निसम्बन्धिनीभिराभातीत्य
ष्टात्रिंशत्कलाभंकिंबहुनेत्यादि ॥ ॥
॥ ॥ ॥

षडूर्मिरहितः शिवः

पाशाश्च शोको मोहौ जरामृती अथवा शीतातपौ श
रीरस्य लोभमोहौ च चेतसः प्राणस्य क्षुत्पिपासे
चक्रमयः षट्प्रकीर्तिताः तथा पंचाशद्भिः केसरैः
केसरैरिति सरंतीति स्वत्मया कुंडलिनी समुत्पद्य
मानैः पंचाशद्भिर्मातृकावर्णैः किंजल्कैरावृतम्
तथा च कुंडलिनी वर्णेन सुषुम्णामनुगच्छंत्या
तस्याः पर्वप्राणाधिकम् भवेत्संसर्गतो नादात्पंचा
शद्वर्णसंभवः पंचाशदं शाकुलितापयदा भवे
त्सा देवी तदात्मविनिवेशितदिव्यभावा सौषुम्ण
वर्त्मसुषिरोदितनादसंगात्पंचाशदीरयति पंक्ति
श एव वर्णान् तथा पुनः कथंभूतं शरीरारविंदं
विषयविकसितं विषयैरन्नपानादिभिर्विकसितं
षडर्थमिति + अष्टांगं च चतुष्पादं त्रिस्थानं पंच
दैवतं ओंकारं यो न जानाति न स ब्राह्मण उच्यते
मंत्रनादबिंदुशक्तिभुजंगमपरात्मिका षोढा श्रीगुरू
वेधदीक्षा का परमेशिना ज्वालाकुलस्य शास्त्रे मं चक्रमष्टा
रकादिकं ध्यात्वा तेनास्य हृच्चक्रवेधनान्मंत्रवेधनं नादाख्या
रेण नादाख्यः स उद्दिष्टो मनियोगतः नादेन वेधयेच्चित्तं नाद
वेध उदीरितः बिंदुस्थानगतं चित्तं भ्रूमध्यपथसंस्थि
तं हृत्स्थं वा महेशानि बिंदुज्वालाकुलाश्रमम् तेनसं
बोधयेत्साध्यं बिंदुव्याप्योयं प्रकीर्तितः शाक्तं शक्तिमद्वा
रान्तधाश्चारेण हृदरि शृंगाटकासनस्थं तु कुंडलिकुंड
लाकृतिम् अनुच्चारेण चोच्चार्य वेधयेत्त्रिशिवं जगद्गुरु
एवं भ्रमरवेधेन शाक्तं वेध उदाहृतः आकारेण वधाद्देहं
न्यसेच्चक्रमयं ततः न्यासयोगेन शिष्याय दीप्यमानं महाविं
षम् पाशस्तोभान्ततत्त्वस्य परतत्त्वेन योजनं इति दीक्षा तु
रेष्टो विधिर्मे शंभुनोदितः ॥ ॥

ॐ जगद्गर्भा कुंडलिनी शक्तिस्सार्धत्रिवलया
कारत्रिकं कुंडलिनी प्रोक्ता इत्यस्मात्र लिप्युद्
रपरिणामोप्यस्याय था। प्रमाणं प्रमेयं एकं प्र
माणं वलयं द्वितीयं प्रमेयं वलयं मध्येतु अर्धरू
पं हंता हृदयं प्रमातृरूपं हंता अयमेव एका
संगाख्येवर्णः अके संगु इति भाषया अस्य
पश्चाद्भाषणं एकं सिद्धमिति अयमर्थः यद्य
पि प्रमातृ प्रमाण प्रमेयरूपं जगदिति अस्या
कुंडलिन्याः सार्धत्रिवलयाकारधारित्वं तथा
पि परमार्थत एकमेवासंगं ब्रह्म सिद्धमिति अ
स्या गर्भ एव अकारादि क्षकारांतं जगत्सर्वं अ
नयैव अकारादीनां वर्णानामुच्चारः एकत्वाद
संगत्वाच्च शिष्यविषये तत्वानुभवबोधनार्थं
लिपिमात्रमेव क्रियते नत्वक्षरविषये पाठ इति
सिद्धांतः ओंकारस्य लिपिभेदेन त्रीणि रूपाणि
बिंदुनादमयं जगदिति वादिनां मध्ये लिपिर्य
था ◌ँ॰ एकसंगाख्यो वर्णोपि ओंकारस्ये
व लिपिः ॐ इयं तु लिपि प्रायुक्तानां त्रिक
वादिनां मतेन पंचब्रह्ममयं जगदिति वादिनां
मतेतु ओंकारलिपिर्यथा ओंकारः ॐ ओं
केषांचिन्मतेन ज्ञानेन क्रियामयं जगत् अन्ये
षां मतेन प्रमाणादित्रयः गुणत्रयः कालत्रयः
कारणत्रयः पुरत्रयः वेदत्रयावस्थात्रयादिम
यं. अन्यमतेन पंचात्मकं पंचकारणात्मकमिति
ओंकारत्रयस्य पिंडार्थ इत्यर्थः ॥ ॐ ॥

रू

ॐ


ॐ ॐ इति वेदप्रणवः ह्रीं इति शान्तिप्रणवः हौं इ
ति देवताप्रणवः ह्रुं इति शिवप्रणवः चूं इति भै
रवप्रणवः ऐं इति वाक्प्रणवः ह्रूं इति क्रोधप्राण
प्रणवः क्लीं इति सिद्धप्रणवः श्रीं इति श्रीप्रण
वः इति द्वादशप्रणवः ॥


ॐकारस्य स्वरूपं श्रुनः ब्रह्मादर्शिनिं रहस्यपराह्वेष्ट
इच्छाक्रियात्मिकाज्ञानं ब्राह्मी रौद्री च वैष्णवी त्रिधाश
क्तिः स्थिता यत्र तत्परं ज्योतिरोमिति शब्दमयं देव ब्रह्म+
मष्टात्रिंशत्कलान्वितं पंचमात्रासमायुक्तं ॐकारेण
परमं शिवं अकारो ब्रह्म इत्युक्तः उकारो विष्णुरुच्यते
मकारो रुद्रदैवत्य अर्धचंद्रस्तु ईश्वरः बिंदुः सदाशि
वो देवः प्रणवः पंचदैवतः सद्योजातमकारस्तु उका
रो वामदेवकः अघोरस्तु मकारो वै तत्पुरुषोऽर्धचंद्र
कः बिंदुरीशान इत्युक्तः पंचब्रह्मात्मकः स्थितः इ
त्यादि अकारो विराट् उकारो हिरण्यगर्भः मकारो
व्यक्तम् एषा त्रिमात्रः त्रिपाद ॐकारः परापररूपा
इति वेदान्तः ॥


ॐ बद्धपद्मासनो योगी नमस्कृत्य गुरुं शिवं नासाग्र
दृष्टिः एकाकी प्राणायामं समभ्यसेत् प्राणो देह
स्थितो वायुरायामं तं निवर्तकं एकोऽश्वास समयी
मात्रा तद्योगो गगनायते बद्धपद्मासनो योगी
प्राणं चंद्रेण पूरयेत् कुंभयित्वा विधानेन भूयः सू
र्येण रेचयेत् अमृतादपि संकाशं क्षीरोद धवल
प्रभम् ध्यात्वा चंद्रमयं बिंबं प्राणायामी सुखी भ
वेत् प्राणं सूर्येण चाहृत्य पूरयेदुदरं शनैः ॐ

भयित्वाविधानेनक्षपयस्वंड्रेणरेचयेत् येनात्मनेत्रंनापू
र्यधारयेदनिरोधतः प्रज्वज्ज्वलनज्वालापूर्णमादित्यम
ण्डलम् ध्यात्वानाभिस्थितंयोगीप्राणायामीसुखीभ
वेत् प्रातर्मध्यंदिनेसायमर्धरात्रेचकुंभकान् शनै
रसीतिपर्यंतंचतुर्वारंसमभ्यसेत् मंदंमंदंपिबेद्वायुंमं
दंमंदंविमोचयेत् नाधिकंस्तंभयेद्वायुंनचशीघ्रंविमो
चयेत् ऊर्ध्वमाकृष्यचापानंवातंप्राणेनियोजयेत् स
वातेनीयतेशक्त्यासर्वपापैःप्रमुच्यते प्राणायामभवेदेवं
पातकेंधनपावकः सोधिमहासेत्वप्रोच्यतेयोगि
भिःसदा योसौहृदिस्थितोपद्मप्रणवोर्कंप्रिविधन्
तस्समध्यपरंतेजोयःप[illegible]पतिसपश्यति सोदयास्तमयं
स संतुसर[illegible]स्मिंसमागमं हृदयंभास्वरंदेवंयःपश्यति
सपश्यति हृदिचंद्रार्कयोज्ञात्वानित्यमस्तमयोदयं
आत्मनोनिजमाधारंनभूयोजायतेनरः हार्दीथकारदृ
यदंपरिज्ञातंविमुक्तिदं सोदयास्तमयंयत्नात्प्राणार्क
मवलोकयेत् नप्राणायामसदृशंकिंचिच्चित्तविशो
धनं सर्वागममनंसिद्धिहेतुर्व्याधिजराहरं प्राणाया
मपराणांतुकिंतीर्थैःकिंमखैःजपैः प्रायश्चित्तैःकिमन्यै
गो र्वादैवैरपिवर्धते ॥ ॐनमःशिवाय ॥ यःप्राणाया
मसंसक्तोशापानुग्रहयोःक्षमः भवेन्नात्रनसंदे
हो इतिधूर्जटिभाषितम् शिवभावनयोपध्याव
द्देमनसिसंस्थितः काष्टकुड्यादिषुच्छिंनेरसव
च्छिवहमतः ॥ धमनी नौली दमनी प्रा
८ णायामः सर्वद्वारप्राणायामः अंतःप्राण
यामः ॥

4







ॐ नमः शिवाय ॥ ॐ दिक्कालकलनामुक्ता देशोद्देशा
विशेषिणी व्यपदेष्टुमशक्यासावकथ्या परमार्थतः
अन्तःस्वानुभवानन्दा विकल्पोन्मुक्तगोचरा याव
स्था भरिताकारा भैरवी भैरवात्मनः तद्वपुस्तत्त्वतो
ज्ञेयं विमलं विश्वपूरणम् अन्त इति पूर्णाहन्तायां
स्वानुभवः स्वप्रकाश आनन्द एव स्वरूपं यस्यास्तादृशी
अत एवामूर्तत्वाद्देः पूर्वापरादिदिक्कालकलना
शून्या देशेन ह्रस्वत्वादिना देशेन चेदंतानिर्देश्य
नलक्षणीयेन रूपेण न विद्यते विशेषो यस्यास्ता
दृशी अत एव व्यपदेष्टुमशक्या. मध्यमाभिजल्पा
विषयः. अत एवाभिधित्सागोचरत्वाभावादकथ्या
वैखर्या अस्पवर्णनीया परमार्थतो वास्तवेन रूपे
णानकथनीया
तदाह एवंविधे परे तत्त्वे कः पूज्यः कश्च तृप्यति ॥
पूज्यपूजकपूजनपूजानां तर्पकादीनां च चिदानं
दैकपरमार्थत्वात् ऊर्ध्वे प्राणो ह्यधो जीवो विसर्गा
त्मा परोच्चरेत् योयमूर्ध्वे इति हृत्तो द्वादशान्तं याव
दूहन् प्राणः यश्च जीवो द्वादशान्ताद्धृदन्तमपानः
एषा परा देवी उच्चरेत् प्राणोयमनिशं जल्पन्स्पंदशक्तिः
सदागतिरित्यादिहि उक्तं. सततं स्वयमुच्चरन्ती स्थिता
कीदृशी. विसर्गान्तर्बहिर्भावकरणरूप आत्मा यस्याः
प्राणाद्याः शक्तिस्पन्दोन्मेषः तदास्फुरणेन विना नि
घतप्राणप्रवाहायोगात् महतोन्तर्बहिर्वापि विषयद्व
न्यनिवर्तनात् । अन्तर्बहिश्च वियच्चुगमं हृत् द्वाद

पूर्णान्तस्थ तत्रमरुतोपानस्य प्राणस्य चानिवर्तनात् ॥
नितरां विश्रान्तेः तदनु स्मरणादित्यर्थः प्राणहृत्कोण
तान्तु ललाटरंध्रान्तदृङ्गताः अपानेपिहृत्कंदानंद
संकोचविकासद्वारदृङ्गताः इति विषयत्वद्वयं यत् तत्र
प्राणापानयोर्द्वयोनिवृत्त्या पूर्णताशून्यावस्थाभव
तीत्यर्थः ॥ अनाहते पात्रकर्णेभग्नशब्देसरिद्द्रु
ते शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
न पात्रे कर्णे यत्र ताडनं पतत् उपलभ्ये सरिद्द्रुते
वेगवाहिनि अभग्नशब्दे अभग्नशब्दनाम्नस्वरूपे
अनाहते नादभट्टारकात्मनि शब्दब्रह्मणि यो निष्णा
तः स परं ब्रह्माप्नोति ॥ यस्य कस्यापि वर्णस्य पू
र्वान्तावनुभावयेत् शून्यया शून्यभूतोसौ शून्याकारः
पुमान्भवेत् पूर्वान्तावित्युच्चारयिषाविरामासौ
शून्यतानुगततया भावयेत् शून्ययेति भाग्वत् अ
मानतः शून्याकारः निवृत्तदेहादिप्रमातृताभिमानः
ते आदिवाच्यशब्देषु दीर्घेषु क्रमसंस्थितेः अनन्यचे
ताः प्लुतान्ते परव्योमतनुर्भवेत् दीर्घता ज्ञानन्य
चेतस्योचितो हेतुः प्लुतान्ते शब्दनिवृत्तौ आन्तरव
न्तान्तरानुदये परव्योमतनुर्भवति तन्मूर्देशेशून्य
तेव क्षणमात्रं विभावयेत् परिमितग्राहकपद
शून्यतेव इति क्षणमात्रमेव अल्पकालमपि नि
र्विकल्पं कृत्वा भावयेत् किमर्थं परादि शून्यभा
वनयेत्याह यः निर्विकल्प इति निरालंबनताप्र
तिपत्त्या अनाहतत्रासः सर्वं देहगतं द्रव्यं
वियद्व्याप्तं मृगेक्षणे भावयेत्ततस्तस्य भावना

१

सास्थिराभवेत् श्लोकशून्यभावनायस्मिनजगतिहृद
यमध्याले, स्वदेहगतमस्थिमांसादि सर्वद्रव्यंविश्व
तोव्याप्तंविशेषेणभावयेत् देहांतरेत्वपिभागंभि
न्निभूतंविचिंतयेत् नकिंचदंतरेतस्य ध्यायन्नध्येय
भाग्भवेत् देहांतरस्वस्मिन्देहविषयेत्वङ्कलक्षणो
योविशिष्टोवहिष्टोभागः तंभित्तिभूतंजडगात्रमिति
कल्पंभावयेत् तस्यचांतर्नकिंचिदस्तीतिध्यायन्न
पि अध्येयभाक् परव्याप्तिरूपःस्यात् पूर्वोक्तकम
मात्मभावोपशमात् हृदाकाशनिलीनाक्ष इत्यादि
हृदिभावेहृच्येतसिणि चाकाशेप्राणापानांतराल
पदेनिलीनतन्नमनलक्षणेनचान्येंद्रियचक्रंयस्य
नाटक् ऊर्ध्वाधरगतपद्मसंपुटमध्य गतोभावनया
नुप्रविष्टः, ऊर्ध्वगतंपद्मंप्रमाणं, अधरगतंप्रमेयम्
तयोर्मध्येचिन्मात्राख्येस्वस्वरूपेस्थितः अतएवनां
न्यस्मिंश्चिन्मात्रातिरिक्तेचेतोयस्यतादृशःसन् पर
सौभाग्यंविश्वस्यस्वस्वरूपं परमानंदविकासेनस्फु
लीयतांप्राप्नोत्येव सर्वतःस्वशरीरस्येत्यादि स
र्वतोरोमकूपांतरेष्वपिचैतन्यदेवस्यप्रवेशेनशरीरे
द्वादशांतायोस्ति नत्रदृढीभूतशासैकाग्र्यं मनोतया
द्विश्रांतिहेतोर्हठयुक्तेर्योगिनः तत्वतत्वपरतत्वप्रका
शरूपं प्रवर्तते प्रसरति ।। यथातथायत्रतत्रद्वादशा ३०
तेमनःक्षिपेत् प्रतिक्षणंक्षीणवृत्तेर्वैलक्षण्यंदिनैर्भवे
त् ।।

यथातथेति स्वरसोदितेन येन तेन संवित्स्मरणप्रका
रेण यत्र तत्रेति सर्वांगेषु मध्यात् हृदयादेशान्तेति
प्रतिहतेण सुक्षुब्धः मनः क्षि
पेत् एकाग्रीकुर्यात् इत्यस्य क्षीणवृत्तेः प्रशान्तचांचल्य
स्यास्य दिनैरित्यल्पेनैव कालेन वैलक्षण्यं आत्मा
न्य परभैरवरूपता भवति एवमेवेति कालाग्निना
उत्थितेन सर्वमिति देहस्य बाह्यस्य च परमः प्रभा
वो भैरवता ॥ तत्त्वलयक्रमेणापि शून्यताभाव
नासह भुवनाध्वादिरूपेणेति भुवनतत्त्वकला
पदमन्त्रवर्णाख्यो यः षोढा वाच्यवाचकरूपो ध्वा
तेन शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः
निर्वृक्षगिरिभित्त्यादिदेशे दृष्टिं विनिक्षिपेत् वि
लीने मानसे भावे वृत्तिक्षीणः प्रजायते निर्वृ
क्षादिदेशः शून्यादिकं तत्र दृक् निक्षेपात् मान
से भावे चित्तस्वरूपे आलम्बनाभावाद्विलीने ग
लिते सति योगी वृत्तिक्षीणः अस्तवृत्तिः महाप्र
काशरूपो भवति उभयोर्भावयोरिति भावद्व
यस्य प्रतीतिकाले मध्यमन्तरालं तत्र भावद्वया व
च्छेदहेतुं शून्यं ज्ञात्वोपलभ्य सम्यगेकाग्र्येण
स्थयेत् ततएव च तद्भावद्वयं युगपत्त्यक्त्वा अ
नालोचनेन परिहृत्य योगिनस्तन्मध्ये तत्त्वं परं
धाम व्यज्यते ॥ गीतादिविषयास्वादासमसौ

स्वैकतात्मनः योगिनस्तन्मयत्वेनमनोरूढेतदा
त्मना गीतमादिर्यस्य वंशवीणाध्वन्यादेर्विषय
स्यतदास्वादाच्चदसमंसौख्यंतेन येकता तद्रूप
आत्मायस्ययोगिनस्तस्यमनोरूढहेतोर्यत्तन्मय
त्वं, शुक्तस्पर्शावेशः तेनहेतुना तदात्मना परब्रह्म
मयत्वापत्तिः एषापिधारणाभवेदितिभूः अनागतायामि
ति अनागतायांनिद्रायांचित्यत्तेनतमस्छादने
बाह्येचविषयपंचके विनष्टदर्शनेयस्य यावस्था
निरावरणमध्येस्ति सामनसागम्या स्वसंविद्व
पुंभस्वीकारात्तयासति सैवपरादेवीत्वेनभातीत्ये
षापिधारणाभवेद्भूः तेजसेति तेजस्फुरणात्प्रकाश
मान निरालंबभावे यदायोगीदृष्टिंरभाति तदा
स्य - - - - - - - - ; स्वात्मरूपंचिद्धनताभा
ति एषाबालसमास्वच्छोमालंबनाणवीप्पानभूः
निराधारमिति यदिदंचयादिज्ञानंतन्निराधारं ब
ह्याधारस्यालंबनस्यवास्तवत्वादतएवनिर्निमि
त्तंचचक्षुरालोकादिनिमित्तस्याप्यवास्तवत्वात् न
हिचिद्व्यतिरिक्तंकिंचिदप्यस्ति अतएवैतज्ज्ञानंभ्रमा
त्मकं मायावशोत्थितं अतश्चैतत्तत्त्वेनानकस्यचि
त्संबंधि। संबंधिनोपिचिद्व्यतिरेकेणानुपपत्तेः ए
वंभावी एवंभावनापरः शिवोभवति शिवे स्वस्व
रूपविमर्शनेनकांतिमति चिंतनोपायता छ्कास्से

घायूः कामक्रोधेति कामादिरूपे गोचरे निहितमिता
मेकाग्रां बुद्धिं स्वसंविदं यावत्करोति तावत्तत्कामाद्यै
काग्र्यप्रकर्षीदपहारितगलितविषयस्वेषं चिदानंदम
यत्वमेव जायते एषा निर्विकल्पोपाधिका पूर्णाभवीरः
यत्र यत्र मनो यातीति यस्मिन्यस्मिन्नीलसुखादौ चम
नो विकल्पः संवेदनं याति प्रसरति तत्रतत्र स्फुरत्तावि
त्मतत्त्वे शिवस्य चिन्मकाशस्यावस्थानं कृया
स्यति न क्वचिद्गमिष्यति अत्र हेतुः व्यापकत्वादिति
दिक्कालाकारैः प्रकाशमानत्वात्प्रकाशमानैः प्रका
शात्मनः स्वात्मभैरवस्यानवच्छेदादित्यर्थः य
त्रयत्राक्षमार्गेणेति यत्रयत्र नीलसुखादावक्ष
मार्गेण चक्षुरादि सुषिरमार्गेण प्रभाः परभैरवस्या
त्मनः चैतन्यं चित्प्रकाशोभिव्यज्यते स्फुरति तस्य
नीलादेः तन्मात्रधर्मित्वात् चैतन्यातिरेके चेत्यत्वा
भावापत्ते दर्पणमात्रात्मक विचित्रप्रतिबिंबवत्प्र
काशस्य चैतन्यमात्रस्वभावत्वं विमृश्य विश्वभि
त्तिभूतायां चितोवेव योलीयते तस्य परभैरवतै
व यथा घनीभूतप्रकाश एव सूर्यमंडलं जातं त
था चिदेव व्याप्यानीभूता जगदात्मना भातीत्या
म्नायः तज्जायंते भय इति अलसत्तानवच्छिन्न
चिदानंदस्फुरत्ता समीपगा निकटमिते वेति
तां तत्र तत्रावसरे विमृश्य समाविशेदित्युपदिष्ट

६

3

मित्येषा पूर्णाभवीभूः ॥ वस्त्वन्तरे वेद्यमाने इति
कस्मिंश्चिदेकस्मिन्वस्तुनि ज्ञायमाने सर्ववेद्ये
षु तदन्येषु गलत्साभ्यतेषु वस्तुषु शून्यता तत्का
त्मना भासनं तामेव वेद्याभावात्मकां चित्प्र
काशरूपां शून्यतां मनसा निर्विकल्पकसंवि
दाध्यात्वा विश्रुष्य विदितावेदनादपि प्रशाम्य
ति पूर्णानब्रह्मस्वरूपो भवति ॥ न व्रजेन्न वि
शेच्छक्तिर्मरुद्रूपा विकासिते निर्विकल्पतया
मध्ये तया भैरवरूपधृत् ॥ मरुद्रूपा शक्तिः न
व्रजेत् हृदः शक्तांतं न यायात् न च विशेत् शक्तं
ताद्धृदयं न गच्छेत् केवलं मध्ये मध्यनाडीधा
म्नि विकल्पाहान्नुपायतो विकासे सति अयं भा
वः दर्शनादीनां सर्वशक्तीनां तया प्रशमितप्रा
णापानभावाभिव्यक्तिभैरवीरूपतया भैरवरूप
धारी योगी भवति इयं मध्यमधामाश्रया एवी
भूः ॥ कुंभिता रेचिता वापि पूरिता वा यदा
भवेत् तदन्ते शान्तनामासौ शक्त्या शान्तः प्रका
शते ॥ रेचिता सती कुंभिता बहिः पूरिता वा
कुंभितान्तर्यदा मरुद्रूपा शक्तिर्भवति तदा तदन्ते
यदा इत्याभ्यासात् प्रशान्तकुंभकावस्थोदये भेदो

पश्यमाच्छांतात्मा असौ शक्तिः शांतः परस्वभावः
नामरूपातीतः प्रकाशते भिव्यक्तप्रथो भवति
आमूलादिति। आमूलादाजन्माधारात् द्वादशां
तं यावत् किरणाभासां मरीचिरूपां क्रमात्क्रमं त
नुतां श्रयंतीं तां मरुच्छक्तिं चिंतयेद्ध्यायेत् कीदृ
शीं द्विषट्कांते द्वादशांते शाम्यंतीम् इत्थं सूक्ष्म
तमस्यापि ध्येयाकारस्य ध्यानप्रकर्षोत्थापितस्या
गलनाद्भैरवस्वरूपता भवति एतदेव प्रपंचयति
उद्गच्छंतीमिति। तामेव शक्तिं तडिद्रूपां विद्युच्च
चलदीप्तोज्ज्वलां प्रतिचक्रं कंदादिब्रह्मरंध्रांत
चक्रेभ्यः क्रमादुद्गच्छंती उल्लसंतीं चिंतयेत् या
वत्परं। विश्वपूरकं ऊर्ध्वमुष्टित्रयं द्वादशांते धा
मे तावन्महाभैरवे काम - - - - - - -
क्रमद्वादशकं सम्यक् द्वादशान्तरभेदितमिति
जन्माग्रमूलकंदनाभिहृत्कंठतालुभ्रूमध्यल
लाटब्रह्मरंध्रशक्तिव्यापिन्याख्यं यत् क्रमाणां
चक्राणां द्वादशकं क्रमेण कुटिलाकृत्या नाहते
न युक्तं यदेतदेव द्वादशकं तत्सम्यगिति क्रमेण
आदिविसर्गांते द्वादशांतरै रंजितं स्थूलसूक्ष्म
परमित्यभिधीयते इति सोपानपदक्रमं मुक्त्वा

त्कापरित्यज्य अंतराभूते परमशिवभावः अस्येकस्या
भाविकं चलं दीप्तमिति स्थित्यादौ ध्यानं स्फुटीकृतं
ततः स्पंदमानं ततोपि ध्यानीरूपतां प्राप्तम् घए०
स्वरवर्जं द्वादशस्वरभेदः ॰ ईदृशेन क्रमेणैव यत्र
कुत्रापि चिंतयेत् शून्ये कुड्ये परे पात्रे इति ॰ मध्य
नाडी मध्यसंस्था बिससूत्राभरूपया ध्यातांतर्व्यो
मया देव्या तया देवः प्रकाशते करुद्धदृगस्त्रेणै
ति अंगुष्ठतर्जन्यादिक्रमेकराभ्यां रुद्धानि दृगुपल
क्षितानि मुखरंध्राणि येन नादृशोऽग्रंजानस्य सुं व
धिनास्त्रेण भ्रूमध्यस्थग्रंथिविदारणाद्देतोर्बिंदौ
दृष्टे क्रमादेकाग्रताप्रकर्षतासीने संविद्गगन एव म
ध्ये अस्य योगिनः परमा स्थितिः भैरवाभिव्यक्तिः ॰
धृतांते शून्यभावनादिति धृतविश्रांतो बिंद्वादि
क्रमेषानारोहेण शून्यभावनाच्छून्यया वेद्यशून्य
तामात्रया परशक्त्या शून्यतामेति भेदशून्यपरभै
रवतामाप्नोति ॰ पृष्ठशून्यं मूलशून्यं युगपद्भा
वयेच्च यः शरीरनिरपेक्षिण्या शक्त्या शून्यमना
भवेत् ऊर्ध्वाधः शून्यभावनया निरालंबदेहसंप
त्तौ शरीरनिरपेक्षणीयत्वशक्तेः ॰ पृष्ठशून्यं मू
लशून्यं हृच्छून्यं भावयेत्स्थिरम् युगपन्निर्विकल्प
त्वान्निर्विकल्पोदयस्ततः भावकस्यापि हृदो मध्य
वर्तिनः शून्यतात्राधिका स्थिरमिति क्रियाविशे
षणम् निर्विकल्पस्य चिद्धामस्त उदयः अभिव्यक्तिः

इदानीं गासशून्यतालंवनक्रमेणादिशति ॥ विश्व
मेतन्महादेवि शून्यभूतं विचिंतयेत् विश्वमिति ज
गत् शून्यभूतं शून्याति शून्यता मात्मे तत्र लयः तन्मयी
भावः भित्तीः पार्श्वानि पुनः शाक्तीं भूमिकामाह
सर्वं देहं चिन्मयं हि जगद्वा परिभावयेत् आपादात्केशां
तं सर्वं देहं चिन्मयं प्रत्यक्चिदेकरूपं युगपदक्रमं जग
द्वा सर्वं निर्विकल्पेन मनसा स्फुरच्चिच्चमत्काररूपव्या
पितो नर्वहि ध्रुवं भावयेत् यत्र यत्र मनस्तुष्टिर्मनस्त
त्रैव धारयेत् यत्र यत्रेति ह्यत्यस्पर्शगंधादौ विषये
मनसः संवेदनस्य तुष्टिरानंदावाप्तिः ॥
भैरवीमाह स्थूलरूपस्य भावस्य स्तब्धां दृष्टिं निपात्य
च अचिरेण निराधारं मनः कृत्वा शिवं व्रजेत् स्थू
लरूपस्येति घटदेहादेः स्तब्धां निरुन्मेष निमेषां
दृष्टिं निपात्य च शब्दादंतर्दशाच कृत्वा निराधारमि
ति परिहृतविकल्पं तेजस्तत्वं समाविशेत् ते
जस्तत्वं चिज्ज्योतीरूपं समाविशेद्धीयोगी ॥
त्यषा प्रागुक्तशून्यभावना विकल्पनात् एकीभूः य
स्य यस्येंद्रियस्यापि व्याघातादाद्याभिभावकस्य
नात् निरोधानुत्तरसोत्थात् प्रायत्निकाद्वा
समनंतरमेवाद्वये शून्ये प्रविष्टस्यांतर्मुखपदे निरू
ढस्य तत्रैवात्मा परं चैतन्यं प्रकाशते इत्यंतर्मुखत्वावि
कल्पापायाग्रताभवी भूः ॥ निराधारेण चित्तेन
प्रवीणवेद्येन संवेदनेन अतश्च यः कश्चिदेवं

५

करोतितस्य ॥ व्योमाकारंस्वमात्मानंध्यायेद्दिग्भिर
नावृतम् निराश्रयाचितिःशक्तिःस्वरूपंदर्शयेत्तदा ॥
दिग्भिरनावृतंविश्वव्यापिनंव्योमाकारमित्यनाकृतिम्
ननुतत्कथं चिद्धर्मीचिदाकाशःसर्वदेहेषुस्थावरजं
गमेषु ऊर्ध्वचिदिति कीदृशःसदाशिवोननास्तिविशे
षः इन्द्रजालमयंविश्वमिति विश्वंग्राह्यग्राहका
त्मजगत् भ्रमदिति नावारूढस्यगच्छत्तरुपर्वतव
उन्मादि विहायनिजदेहंस्यामिति निजदेहस्था
स्वदेहेममात्मतांविहाय सर्वमहमितिसदाशिवेश्व
वन्ननुचिद्धर्मेस्त्वकचिन्मात्रात्मशिववत्स्वरूपेण निः
संशयेनमनसा चिन्तेन तयाहृष्टास्वसंविदाना
न्योस्तिएषाप्रोक्तवस्तुविमर्शैकाग्रतयाभावयेत् ॥
सएवाहंशैवधर्माइति शिवस्यायंशैवः
स्वच्छतास्वातंत्र्यादिरपिधर्मोयस्यसएवाहमहमेव
चसः इयंशाक्तोपायस्य: समौशान्तेचमित्रेचेत्या
त्मादि शाक्तीभूमिः ॥ नद्वेषंभावयेत्क्वापीत्या
दि प्रसर्पतिविकसति इयमकिंचिच्चिंतनात्माशा
म्भवीच नित्येनिराश्रयेशून्येइति नित्यत्वादिवि
शेषणप्रतिपादितव्यापिकेबाह्यगगनेमनोनिश्च
यात्मकंज्ञानेकृत्वासमापत्त्याविधाय निरालंबनचि
तुदये सम्यकाकाशातिक्रान्तमशून्यधामसमाविश
ति इतिशाक्तमेव ॥ नित्योविभुर्निराधारोव्याप
कश्चाखिलाधिपः शब्दान्प्रतिक्षणंध्यायन्कृतार्थोर्था

तद्रूपतः विभुः परमेश्वरो नित्यत्वादिस्वरूपः
इत्यर्थानुगुण्येन तान् शिष्यान् गुरुः चिंतय
न् कृतार्थः कृतकृत्यो भवतीत्युच्चाररहित
वस्तुचिंतनात्मेयं शान्तीः आत्मनो निर्विकार
स्येति चिदात्मनो निर्विकारत्वात् ज्ञानैकरूपस्य
निर्विभागत्वे कस्यानंदकत्वं क्रियेत्युत्तरे अनस्य
ज्ञानक्रिययोरभावात् ज्ञेयकार्यादिरूपं जगदपि
न किंचिदिति निरूढस्य संविदोऽनन्तरभावप्राप्तिः
इति शान्तीसूः न मे बंधो न मे मोक्ष इति केवल
मेतां बंधमोक्षादिकल्पना मायाशक्तिवशादपराम्
ष्टस्वरूपस्य भीतस्यैव द्वितीयाद्वै भयं भवतीति द्वैत
त्वस्य ननु चिद्द्वैतपरामर्शशीलस्य विभीषिकाः
चटकभीत्युत्पादनशान्तिरदारणार्थः पलालपुरुषा
द्याः तत्वज्ञानिन ननु किं करिष्यन्त्येता अनेन बंधनं
इदं न कर्तव्यं इदं कर्तव्यमनेनैव मोक्ष इत्याद्याः कल्प
नाः यदुक्तं कल्पनाकल्पनकविनापि प्लालीन्प
लालपुरुषो वतियः कृशानुदग्धाननस्फुटकपेट
क भीतिदानैः ग्रामे स एव विहितो विपिने विदध्या
त्किं तत्र भंजनकृतां वनकुंजराणामिति। इन्द्रियद्वा
रकं सर्वमिति संबध्यमानं शब्दादि सर्वमिंद्रियद्वा
रायातं ननु मम चिदात्मनो वाह्यत्वमित्यतो हेतोरि
न्द्रियाणि परित्यज्य । ध्यानं यानि श्चलाचिंतानि
राकारानिराश्रया निश्चलाप्ररूढा चिंताविमर्शः

६

6

निराकारा उल्लेखशून्या निराश्रया कंदहृद्द्वादशांता
द्याश्रयहीना। अपरत्र गलोपकरणपूर्वा पूजा
यस्मिन्दर्शने तु निर्विकल्पदिव्यपदावेशादन्यत्रा
र्चनमित्याह पूजानामेति। निर्विकल्पे महाव्यो
म्नि। महाव्योम्नि परचित्प्रकाशे आदराद्दृढाप्रकर्षा
द्योलया विश्रांतिः सा यस्मात्पूजा तस्मात्सध्याद्ये
र्नामनपूजा। महाशून्यालये इति महाशून्यस्य
शून्यातिशून्यपदस्य समंताल्लयो यत्र परतत्वात्मनि
वक्ष्ति तत्र भूतेंद्रियविषयभुवनतत्वादिरूपं विश्वं स
कलाजगद्विभागकल्पनाहेतुना मनसा सार्धं चेत
नाविश्वानुसंधात्रीशक्तिरेव हुतं तया हूयते यस्य
होमः येरेव पूज्यते द्रव्यैस्तर्प्यते वा परापरः यश्चै
व पूजकः सर्वः स एवैकः क्व पूजनम् येरिति ऊहमा
दिभिरलिवलिपिशितादिभिश्च। परापर इति। परा
देव्या सहितः परः परमेश्वरः अतः क्व पूजनं उ
क्तपारमार्थिकपूजाव्यतिरेकेण न किंचिदन्यत्पूज
नादीत्यर्थः ॥ अकिंचिच्चिंतकस्यैव गुरु
णा प्रतिबोधितः उत्पद्यते य आवेशः शांभवोसावु
दीरितः ॥ न किंचित् ग्राह्याकारं ग्राहकाकारं वा चिं
तयति विमृशतीत्यकिंचिच्चिंतकः निर्विकल्पस्वस्व
रूपनिष्ठः प्रमाता तस्य प्रतिबोधनो गुरुणा स्वात्मम

हेस्वरानुभवेनैव गुरुणा दैशिकवरेण न पुनः क्रमेण मायीयविकल्पमान साधारणादिकैषाडंबरेण यश्चावेशः सहजः समावेशः शुद्धे चिद्रूपे शिवे मज्जनं अनुपम परमानंदामृत धारास्यंदिनि कुंदे तन्मयीभावदशा इतियावत् ॥ अथ नंत्रोनरस्नानं ॥ ॐ स्नायाच्च विमलेतीर्थे पुष्करे हृदयाश्रिते विंदुतीर्थे यथा स्नात्वा पुनर्जन्म न विद्यते । इडा सुषुम्णा शिवतीर्थे केस्मिन्‌ज्ञानांबुपूर्णे वहतः शरीरे ब्रह्मांबुभिः स्नानितयोस्य दायः किंतस्य गांगेरपि पुष्करैर्वा इतिस्नानं अथ संध्या शिवशक्तो समायोगे यस्मिन्काले प्रजायते सा संध्या कुलनिष्टानां समाधिस्थे प्रजायते यदात्मा प्रजयात्मानं संधिने परमात्मनि तेन संध्या ध्यानमिति तस्मात्संध्याभिवंदनम् इतिसंध्या अथ तर्पणं मूलाधारात्सोम सूर्याग्नि रूपिणी कुंडलिनी समुत्थाप्य परविंदुं निर्भिद्य तदुद्भवामृतेन देहेन देवतां तर्पयेत् ॐ चंद्रार्कानल संघट्टाज्ज्वलितं यत्परामृतम् तेनामृतेन दिव्येन तर्पयेदिष्टदेवताम् ब्रह्मरंध्रादधोभागे यश्चर्नुपात्रमुत्तमम् कलासारेण संपूज्य तर्पयेत्तेन खेचरीम् इतितर्पणम् ॥ अथ ध्यानं किरणस्य तदग्निस्य चंद्र ...

शरीरे

वतेभिद्यते हृदि ग्रंथिश्छिद्यंते सर्वसंशयाः
स्थांचित्त यदार्थे सर्वे क्षीणि पुनर्जन्मते ॥ ७

महाशून्येलयंकृत्वा पूर्णोतिष्ठतियोगिराट् अथवा ॥
निरालंबेपादशून्ये यत्तेजउपजायते तद्गर्भमव्ययमनि
त्यंध्यानमेतद्धियोगिनाम् इतिध्यानं अथांतरपूजा
मूलाधारात्कुंडलिनीमुत्थाप्य हृदयार्कमंडलंनीत्वा
कर्णिकांतर्गतचंद्रस्थयामूलमंत्रंस्मरन् सिंचिदि
ति अर्चयन्विषयैःपुष्पैस्तत्तद्गुणानन्मयोभवेत् न्या
सस्तन्मयतातुद्धिःसोहंभावेनपूजयेत् मंत्रादेरा
लिचिह्नकौशानानितानिभावयेत् तामेवपरमव्यो
म्नि परमामृतवर्षिणि दर्शयत्यात्मसद्भावं पूजाहोमा
दिभिर्विना इतिपूजा अथहोमः आत्मनापरम
श्छिन्नंविभाव्य आत्मांतरात्मपरमात्मज्ञानात्मनाहु
स्वरूपं चतुरस्रं चित्कुंडमानंदमेखलायुतं अर्धमा
त्राकृतियोनिशोभितंनाभौध्यात्वा तन्मध्यस्यज्ञाना
ग्नौजुहुयाद्यथा मूलांते ॐचैतन्यपररूपाग्नौहवि
षामनसास्रुचा ज्ञानप्र- - - - - - मदाहमीर्जुहो
म्यहम् अनेनप्रथमाहुतिं १ मूलांते ॐधर्माधर्म
हविर्दीप्ते स्वात्माग्नौमनसास्रुचा सुषुम्णावर्त्मना
नित्यमदाहमीर्जुहोम्यहम् इतिद्वितीयाहुतिम् २
मूलांते प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रु
चा धर्माधर्मकलास्नेहपूर्णमाग्नौजुहोम्यहम् ३
स्वाहावौषट् अनेनतृतीयाहुतिंदद्यात् ततोयो
जनिका ततोमूलांते ॐअंतर्निरंतरनिरिंधनमेध

यानेमायांधकारपरिवेष्टितानिसंविदग्नौ कस्मिंश्चिदन्त
तमरीचिकमेवभूमौविश्वंजुहोमिवह्नथादिशिवावसा
नम् इत्यंतर्यजनेकृत्वासाक्षाद्ब्रह्ममयोभवेत् नत
स्यपापपुण्यानिजीवन्मुक्तोभवेद्ध्रुवम् अयमंतर्या
गोज्ञानिनामेव अंतर्यजनेसुराशक्तिः तत्कर्तीभैर
वः स्वयम् तयोरैक्यंसमुत्पन्नो ह्यानंदोमोक्षउच्यते
आनंदंब्रह्मणोरूपंतच्चदेहेव्यवस्थितं तस्याभिव्य
जकंद्रव्यंयोगिभिस्तेनपीयते लिंगत्रयविशेषज्ञः
षट्चक्रपद्मभेदनः पीठस्थानानिचागत्यमहापद्म
वनंव्रजेत् आमूलाधाराद्ब्रह्मरंध्रंगत्वापुनःपु
नः चिच्चंद्रकुंडलीशक्तिसमरस्समहोदयः २ षडु
क्तं श्रीमहामाहेश्वराचार्याभिनवगुप्तपादैः २ उ
ह्यामिरोधकृतभुक्दग्धविश्वेंधनोद्दिते सितभ
स्मनिदेहस्यमज्जनंस्नानमुच्यते इत्यंचविहित
स्नानतर्पितानंतदेवताः ततोपिदेहारंभेनतत्त्वानि
परिशोधयेत् शिवात्मकेषुप्पेतत्शुद्धिर्याव्याति र
किनी सैवाशुद्धिः पराख्याता शुद्धिस्तज्जीविम
र्दनम् यत्किंचिन्मनसाभ्यासादि यत्रैकापीन्द्रि
यस्थितो योज्यतेब्रह्मसद्माग्नि पूर्णीपकरणेहि
तत् ॥ श्रीमद्वीरावलीचोक्तंगोधमात्रेशिवात्म
८ के चित्तप्रलयरोधेन प्रलीनेशशिभास्करे प्रा
णेवद्वादशेभागेजीवादित्येखगोधके मोक्षःस

8

एकचित्तः प्राणायामो निरर्थकः प्राणायामोनक
र्तव्यः पूरीरं येर्नपीड्यते रहस्यं वेत्तियो यत्र स मुक्तः
स च मोचकः प्राणएवशिवो श्रीमत्त्रिशिरस्या
दिनाहिंसा वह्नयागादिकालेनु निष्फलत्वाद्धि
वात्मिका यदुक्तं कुलार्णवे द्रव्यं मधु तथा म
त्स्यं मांसं मुद्रा च मैथुनम् मकारपंचसंयुक्तं पूज
येद्भैरवेश्वरम् द्वादशांते तु विश्रम्य परमामृतम
श्नुते मद्यपः स भवेद्देवि शेषस्तु मद्यघातकः १ म
नसा चेंद्रियगणं संयम्यात्मनि योजयेत् मत्स्याशी
स भवेद्देवि चान्यस्तु प्राणघातकः २ पुण्यापुण्य
पशुं हत्वा ज्ञानखड्गेन योगवित् परे लयेनयेच्चि
त्तं पलाशी स निगद्यते ३ तिलकं ब्रह्मसूत्रं च
पवित्रं धौतवस्त्रकम् केशाग्रेपि समायुक्तं पंच
मुद्राधरो द्विजः ४ चित्तं जीव लयेनीत्वाजीवेपि
त्ततथैव च मैथुनं तत्तु विज्ञेयं नतु स्त्रीभोग एव हि
[illegible] यो नश्वरं प्राणभृतां हृदब्जे धनत्यभीक्ष्णं भ्रम
णायमाणः अश्रं च शाद्वादिपरागमुच्चैः नमोस्तु
चैतन्यशिवाय तस्मै १ स्वदीधितीनां करणैश्चरी
णां चिदर्कमूर्तिः समुदेत्य मध्ये ग्रासीकरोत्येष ह
ठात्त्रिलोकीं नमोस्तु चैतन्यशिवाय तस्मै २ स प्राण
वाङ्क्तिशिखेन भिन्ना विरिंचिमुख्यानयकारणेशान्

प्रशांतकोपः परधाम्नुदेति नमोस्तु चै. ३ तृतीयने
त्रात्मकमध्यधामविकासिवर्णिकाज्जु तहृयंचंद्रः
योगीसमाप्नोत्यमृतीस्वरत्व नमोस्तु चै. ४ कदा
दिचक्रादिनदेवतानां प्रियोपिसन्प्राणशिखांत
राये योप्रानहृत्याभजनेप्रहृतिं नमोस्तु चै. ५
प्राणात्मिकाशक्तिरपानशक्तिस्तयोर्द्वयोर्धूर्णि
कशात्मनोर्यः मध्येप्यघोरेशउदानमूर्तिर्न
मोस्तु चै. ६ ऐकात्मनानोभयात्मरूपा याःक
ल्पना:कल्पितदेहभाजः ताश्चेतियोमध्यमधा
म्नुदेति नमोस्तु चै. ७ योगेन चैतन्यशिवःस्तु
तोयंशिवाष्टकेनेति शरीरसंस्थः तेनाशु सर्वस्य
शिवंकरोतु शिवःसुहृन्मध्यमधामधामा ८

त्रिनेत्रः भूतभविष्यद्वर्तमान. अथवा सूर्यसोमाग्निः

नागदारकः
महादेवः
महेश्वरः
शंकरः
वृषध्वजः
कृत्तिवासः
कामांगनाशनः
देवदेवः
श्रीकंठः
ईश्वरः
पार्वतीप्रियः
त्रिमूर्तिः

चैतन्यशिवः
विमर्शशक्तिः
गुरुः


पंचमुख चिदानंद, इच्छाज्ञान, क्रिया

यदुक्तमभिनवगुप्तपादैः

उपायजालं न शिवं प्रकाशयेद्घटेन किं भाति सहस्र-
दीधितिः। विचारयन्नित्थमुदारदर्शनः स्वयंप्रकाशं
शिवमाविशेत्क्षणात्। उपायजालैर्न शिवो भाति
भात्येतत्प्रसादतः

यदुक्तं मोक्षोपाये निरंशत्वाद्विभुत्वा-
च्चतथ्यानश्वरभावतः ब्रह्मव्योम्नोर्न भेदोस्ति चैत-
न्यं ब्रह्मणोधिकम्। यदुक्तं श्रीमन्नेत्रोद्योते
शिवो हि नाम निखिलतत्त्वहृहणाद्रुहोच्यते
मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः स्वरूपं
स्वात्मनः संविदित्याह भगवान् शिवः ॥

निद्रादौ जागरस्यान्ते यो भाव उपजायते तं भावं भावयन्सा-
क्षादक्षयानंदमश्नुते। जाग्रदादौ ततः स्वप्नः सुषुप्ति-
स्तदनंतरमित्यवस्थानां गणनाक्रमः प्रसिद्धः तत्र अ-
यमर्थः निद्रादौ सुषुप्तेः प्रथमं जागरस्यान्ते जाग्रद-
वस्थानंतरं यो भावो वृत्तिः स्वप्नाख्योमध्ये उपजायते
अस्ति अनेकार्थत्वाज्जायते नाम यमर्थः तं भावं स्वप्नाख्यवृ-
त्तिं भावयन् निश्चिन्वन् विमृशन्निति यावत् केन प्र-
कारेण भावयेत् स्वप्नमित्याह साक्षात्प्रत्यक्षं यथा भव-
ति तथा इदमत्र तात्पर्यं प्रत्यक्षाभासे स्वप्नप्रपंचजालम-
वस्वप्नवदसत्यतया विमृशन् प्रमाता अक्षयानंदम-
विनाशि परमं सुखमश्नुते आनंदरसो भवत्येवेति ॥



ॐ अस्य श्रीआनंदेश्वरभैरवमंत्रस्य कालाग्निरुद्रभैरव ऋषिः
गायत्री छंदः श्रीआनंदेश्वरो भैरवो देवता श्रीं बीजं ह्रीं शक्तिः
क्लीं कीलकं सर्वकार्ये विनियोगः ॥ स्वात्मन्यासः ॥ ह्रां हृ फ्रीं शि
हूं शि। ह्रैं क। ह्रौं ने। ह्रः अ॥ एवं करन्यासः ॐ ह्रां श्रां हृ।
ह्रीं श्रीं ह्रीं शि। हूं श्रूं ह्रूं शिखा। ह्रैं श्रैं ह्रैं क। ह्रौं श्रौं ह्रौं ने।
ह्रः श्रः ह्रः अ ॥ इति स्वात्मन्यासः तत्र गायत्री ॐ आनंदेश्वरा
य वि[illegible] महे गंधनारीश्वराय धीमहि तन्नो अर्धनारीश्व
रो प्रचोदयात् ॐ ह्रूं वामदेवाय विद्महे तुष्टदेवो धीमहि तन्न
ः [illegible] प्रचोदयात् अथ ध्यानं ॐ सूर्यकोटिप्रतीका
शं चंद्रकोटिसुशीतलं अष्टादशभुजं देवं पंचाननं त्रिलोचनं
अमृतार्णवमध्यस्थं [illegible] तव [illegible] नील
कंठं सर्वाभरणभूषितं कपालखट्वांगधरं वरदाभ
यहस्तिनं पाशांकुशधरं देवं गदामुसलधारिणम् खड्गखे
टकपट्टिशं [illegible] शूलकुंतेन [illegible] विचित्रवेष्टकामदं
[illegible] भयपालितम् लोहितांगं सदेवीकं [illegible] नमस्तं
आनंदभैरवं ध्यायेत् योगमोहैककारणम् दत्वा पुष्पांजलिं
[illegible] नर भैरव [illegible] मार्ग [illegible] सवेजसः
[illegible] भैरवं [illegible] पुष्पं दत्वा वा नादि गणमूलं ॐ ह्रीं श्रीं क्लीं ॐ आनं
देश्वरभैरवाय वौषट् स्वाहा मेगनांदेशामः ॐ आ
[illegible] चंद्रकोटियुतप्रभाम् हिमकुंदेंदुधवलां पंचव
क्त्रां त्रिलोचनां अष्टादशभुजैर्युक्तां सर्वाभरणभूषितां [illegible]
प्रहसंती विशालाक्षीं देवदेवस्य संमुखीं ॐ [illegible] स्वा

ॐ नमः शिवाय ॥ ॐ नमो भगवते रुद्राय ॥

ॐ स्नानपूजनसमाधिभिः क्रमाच्चन्महात्मभि
रवाप्यतेपदम् कैश्चिदक्रमनएवयन्मयान
त्समर्चनमिषेणकथ्यते १ गालिकारचि
तवस्त्रपत्रिकाक्रीडनेनसहपानदर्चनम्
यत्रशाम्यतिमनोननिर्मलंस्फीतचिजलधि
मध्यमाश्रितम् २ किंतदर्चनमनल्पक
ल्पनाजालशंवरनिपातितात्मनाम् यत्रना
स्तिसविकल्पनोज्झितः स्फीतसौख्यशिवसं
गमोत्सवः ३ अप्रयत्नमनिकेतनंपदंदि
व्यमाप्यमनसैवहृत्नयः यत्रयातिविलयं
नसर्वतः किंतदर्चनमसोपराभवः ४ य
त्रवर्षतिनखेचरीस्थितिश्चिन्सुधारसभरो
च्चनिर्झरम् देहचित्तपरिपीडनावहं किं
तदर्चनमसोपराभवः ५ खेचरीप्रभृति
पंचकात्मनाव्याप्तिमंगगतांनिभालयन्
हृद्धिकासहभगंभवापदोयत्रमुंचतिन१

किंतदर्चनम् ६ यत्र साहससमाधिसंश्रयः प्रस्फुरद्विमलबोधनिर्भरः स्फीतसंविदुदयं नविंदते सर्वदृत्ति भुकिमतदर्चनम् ७ विश्व सहनिरसैकतत्परोलेलिहानरसनाऊलो यमः यत्रचिच्छिविशिवोहहूयते लीलये वनकिमतदर्चनम् ८ स्वच्छमप्यरमनोह रद्दशः प्रोल्लसन्मुलकलंबितानतः मध्य माध्रुवमनल्पसस्पदंयत्र नाश्रयतिकिंतद र्चनम् ९ मानसे यमिनिकस्पिनोज्झितो निर्विकारमनिकेतनःशिवः गाढगाढम वगाह्यतेदृशान्नैवपत्रननुकिंतदर्चनम् व्योमकल्पिममितंनिजंवपुर्वीक्ष्यचित्परह धारसोचितम् स्वात्मनात्मनि निरालकल्प नोयत्रहष्यतिनकिंतदर्चनम् ११ निर्निके तनिरुपाधिनिर्मलस्फारचिद्भवमरीचिसं चयैः विश्वमारचितमीक्ष्यविस्मयंयत्रना श्रयतिकिंतदर्चनम् १२ यत्रनित्यपराहर्ष

प· त्रि· १

निर्भरचित्सुधारसनिपातघूर्णिनः ध्यान
योगकलनासु लज्जते नीरसासु न किमे
तदर्चनम् १३ शक्तिविस्तरविमर्शविस्फु
रत्कंदयुग्मयुगपद्विगाहनात् भैरवं व
पुरुदारचेष्टितं यत्र न स्फुरति किं तदर्चन
म् १४ इंद्रियेषु विषयानुवर्तिषु प्राण
वर्त्मनि निजप्रवाहके कापि निर्वृतिम
यी चिरूर्जिता यत्र नोल्लसति किं तदर्चन
म् १५ दिव्यखेचरहृष्ट्या निरीहया नाद
बिंदुमयभावसंचयम् यत्र शुष्कमिव पा
वकस्तृणं न स्तयं नयति किं तदर्चनम्
शांतिमेति न विकल्पविप्लवश्चित्चमत्कृ
तिरसो न वर्धते लुप्यते न घनवासनाव
नं कापि नाभिरसमानतायते १७ मन्य
ते न कृतकल्पनां मनो द्वैतमेव तिमिरं न
भिद्यते यत्र दोषघनसंकुलं मनो न प्रसी
दति किमेतदर्चनम् १८ चित्रभस्वर

रसिसारंसीपरांशक्तिमच्छविभवांप्रबोध
यन्‌ मंत्रवीर्यमपितंनिसर्गतोयत्रनाश्र
यतिकिंनदर्चनम्‌ १९ निर्विकारमजडं
निरामयंनिर्विकल्पमजरंनिजंवपुः वीक्ष
जन्ममरणादितंभयंयत्रमुंचतिनकिंनद
र्चनम्‌ २० पूर्णतिवीचिचयसिंधुसन्निभा
सर्वसंविदुदयावनिंपराम्‌ सृष्टिसंस्थि-
तिलयप्रशक्तिभिर्विश्वसुंदरविवर्तवर्नि
नीम्‌ २१ शक्तिचक्रपरमादिदेवतामंग
प्रणमभूमिकामनाम्‌ मंगलामसममं
त्रमातरंयत्रपश्यतिनकिंतदर्चनम्‌ २२
युग्मम्‌ सोमसूर्यदहनेंधनोच्यतस्फीत
चिज्ज्वलनदीप्तिभास्वरः दुर्निरीक्ष्यगतिर
क्रमःशिवःभातियत्रनकिमेतदर्चनम्‌
आत्मनात्मनिनजानतेविधिंनिस्तरंगपर
बोधभास्वराः यत्पदस्थितिजुषोमहाज
नास्तंकिसंसहतिसमानतुङ्गयः २४ य

प॰
त्रि॰
२

यदापतति वेद्यतां भुवं नेन तेन ननु यद्विवर्जितम्
नित्यनिर्मलसमाधिभूमयो यत्पदं विमतिगालकल्प
नाः २५ यद्विस्फुरत्वलमहोदयोल्लसच्छक्तिपातव
शतो विजृम्भते तत्पदं यदि गुरुप्रसादतो लब्धमु
त्तमम् अप्यर्चितः शिवः २६ भावसंचयविमुक्तवि
ग्रहा विश्वमय्यपि परप्रपात्मिका कापि संविदम
लांतरप्रभा जृम्भते यदि तदार्चितः शिवः २७ किं
चनापि न च मुच्यते क्वचित् किंचनापि न च गृह्य
ते क्वचित् स्वं वपुर्विमलबोधनिर्भरं दृश्यते य
दि तदार्चितः शिवः २८ भैरवादिविविधकल्पनात्म
काः प्रोल्लसन्निवहवो यतोऽम्बिका मायतः स्फुर
ति तत्परं पदं भाति चेद्गुरुदृशा शिवोर्चितः २९
श्रीसादितं गुरुमुखोदिदमप्रयत्नसिद्धं शिवार्च
नमपास्यधियामवाप्यम् यत्तन्मया निगदितं
तदनल्पवांछासंशोधनाय सुधियां शिवभक्ति
भाजाम् ३० अनवच्छिन्नचिद्धामपरमामृत
बृंहितः नागाभिधोव्यधादेतां परमार्चनत्रिंश
काम् ३१ इति परमार्चनत्रिंशिका समाप्ता

ॐ नमः शिवाय ॥ ॐ लोकोत्तराद्भवसस्मि
तघूर्णमानस्वानंदसुंदरविनिर्मलनिर्निमेषा
यत्स्फारतः पशुरपीश्वरतामुपैति सा कापि दृ
ष्टिर्जयते गुरुपुंगवानाम् १ दिष्ट्या भवानल
शिखोच्छलत्तापतप्तं जन्माटवीषु विषमासु कद
र्थितं यत् चेतस्तदेतदधुनामलचित्सुधाब्धि
मध्ये निमग्नमसमां भजते प्रशांतिम् २ व्यामूढ
मंधमिव संशयदोषदुष्टं चेतो यदेतद् भवद्भ
वदुःखपात्रम् जातं तदद्य गुरुपादसरोजसे
वासंजातनिर्मलविबोधमहाप्रकाशम् ३
संकोचमाश्रितवतो निविडं विमोहाद्यस्याभव
न्भयमिहेंद्रियपन्नगेभ्यः चेतस्तदाप्य विमलो
ज्जितसंविदाज्ञां निःशंकमद्यरमतो विषयाटवी
षु ४ कंदर्पबाणविषमैर्हरिणेक्षणाभिः पी
तं हृतं कवलितं मुषितं यदासीत् तन्मात्रम
मुपगतं परमोदलक्ष्मीप्रेमामृताद्भुतकटा
क्षपरम्पराणाम् ५ क्लिष्टं यदेतदभवज्जप
कष्टयोगप्राणप्रवाहविनिरोधकदर्थनाभिः
चेतस्तदद्य परमाद्वयसामरस्यसंजातसंम

सं॰ त्रि॰ २

3

दरसासवपानमास्ते ६ योभेदतीव्रशिशिरप्रस
रोपघातभीतोमनोमधुकरोहृतशक्तिरासीत् आ
साद्यसोद्यशिवधाममधुंसदास्ते संविहृताऊ
सुमसौरभपानमत्तः ७ व्यक्तस्वतंत्रनिजरूप
महाप्रभावंयत्कर्मविंदुधरणीष्ठुनिलीनमासी
त् स्वच्छप्रभाप्रसरिहारितसर्वलोकं चेतश्चिदं
बरपदेनतदद्यभाति ८ यन्नेनवांछितमन
न्यविकल्पजालविच्छेदतिरस्कृतमवापनयत्प्र
वेशम् दुर्भेदभित्त्यविषमार्गलभित्त्यमार्गचेत
स्तदद्यरमतेप्रियवमंदिरान्तः ९ योगव्रतादिनि
यमैरुपसेवितापिनावापदर्शनपथंकिलयस्य
जातु संविन्प्रियासभगसूच्छितभागपसंपच्चेत
स्तदद्यनजहातिमुहूर्तमेकम् १० दुःखैकसा
रइतिभीमइतिप्रयत्नात्संसारएषकिलयस्यव
भूवहेयः दिष्ट्यासएववपरंचिद्रससामरस्यसं
जीवितःप्रयतितस्यविमुक्तिसाम्यम् ११ तृष्णा
करालकरवालविलुप्यमानंयद्विस्मृतात्मविभ
वंकृपणंवभूव उच्चैरकिंचनतयापितदद्यचेतः

स्वात्माविमर्षपरहर्षमुदारमाप्ते १२ कस्यार्जि
तस्यसुकृतस्यफलंतदेतन्मुख्योदयस्तवकृतो
यमनन्यलभ्यः संविक्रियागलितभेदविक
ल्पयायदेकंमुहूर्तमपिनैवविमुच्यसेत्वम्
वार्तामहेक्वचननामनचिंतदिष्ट्यावर्धामहे
वयमहोमुदिताभवामः यत्वांसखेपरनिहन्त
रघ्रौवसंपत्संभोगमध्यरतरंपरिलोकयामः १४
ध्यानेर्चनेजपिनकदाचनकाचनापिकृत्वापिनि
र्वृतिदशांवतयन्नलेभे दिष्ट्यानिमग्नमपिसंव्य
वहारमध्येचेतस्तदच्यनविमुंचतिपारिपूर्ण्यम्
सर्वेषुचित्तमधुपोविषयद्रुमेषु रभ्रामयस्सत
तमस्तमितामिलाषः दैवादवाप्यपरमेश्वरपा
रिजातंत्वमोविलीनश्चमुंचतिचंचलत्वम् १६
यैरिंद्रियैरसिवशीकृतशक्तिचेतः पूर्वंकदर्पि
तमभूत्सहितैरिहोच्चैः स्वच्छानिकेतपरचित्त
सुसंविभक्तैरिष्याचतैरनुचरैरिवराजसेत्वम्
चिंतांततानकरणंप्रललापपूर्वंयत्संकुचत्स्थि
तिभयंरविजाद्विचार्य चेतस्तदद्वयमिदंनिज

सं· त्रिं· ४

4

रूपमीदृग्दिदृक्षाद्यनिर्भयममंदमुदानुमाले १९
नित्यं यदेतदभवद्विफलप्रयासं हेवाकदुर्ल
लितमप्रणिपातात्मभावम् संविन्सुधारसचम
त्कृतिचूर्णमानं दिदृक्षु नितरां स्पृहणीयमालो
चिंताशतानाकुलनरं नरान्तिं कदाचिज्जीनंभवाद
भजनैकमपिक्षणं यत् चेतश्चिदात्मकमिदं
सकलं विलोकमहमप्रबुद्धमिव निर्वृतरूपमा
ले २० वंदामहे किमतुमः किमु गौरवेण ह
र्षेण चित्र किमु नाम न पीडयामः संप्राप्तदुर्ल
भमहोदयश्रीव संपन्नां कौतुकेन किमु मित्र वि
लोकयामः २१ आगस्कृतामियमनादिघ
नप्रबंधस्नेहानविद्धहृदयाहृदयाद्यमाया
संसेव्यतां सुभगसेवपदप्रवेश संप्राप्तदुर्लभ
महोदयमोदलक्ष्मीः २२ किं ब्रूमहे त्र भवते
सुकृतेन मन्ये सर्वाशिषामविषयेन नुवर्तसे
त्वम् यत्कारणाधिगतनिर्मलनिर्विकल्प
स्वच्छंदशंकरपदेभनसेत्वरागम् २३ चित्रं
तदेतदसमं यदभूत्सुखेषु ग्रामेष्वनिर्वृतिदृशा
मनुवर्तमानम् दुःखेषु दुःसहतरेष्वपिचि

ऽतदय +

तमच्यपूर्णप्रमोदरसनिर्भरसेतदाले २४ वि
श्वंनिगीर्यसहसाकवलंविधायकालंप्रशांतगग
नोपमदिव्यमूर्त्तिः याराजतेनिरुपमामृतपूरपू
र्णासाकापिखेचरगतिर्जयतित्वदीया २५ तेका
रणाधिपतयःप्रलयंप्रयांति यस्मिन्महावटतटे
विषमेगभीरे शक्तिनिजंवपुरपिप्रसभंत्यजंति
तन्नामसंश्रयसिवीरवरत्वमेकम् २६ विद्युद्वि
लासचपलेविभवेनतांगीभ्रूभंगभंगुरतरेपिच
जीवितेस्मिन् चिंतत्वयैवविजितंश्रयतांविना
शिदिग्देशकालकलनारहितंपदंतत् २७ स्व
स्पल्लतेस्वरविकस्वरसंप्रदायसंप्राप्तपूर्णभवप
दोदितसंमदाय दुर्वारसंसृतिदशाह्वपिनिर्वि
कारनित्योदितात्मविभवायभवाभवाय २८ स्व
च्छंदनिर्मलपदोदितनिर्निकेतसंवित्सुधारसच
मत्कृतिनिर्भरोस्मि दिष्ट्यामहुरुमुखात्तुजनमध्य
लव्धानुच्चार्यचारुकथनोदयविस्मितोस्मि
भवमरुभुविश्रांतोमोहाध्वगएषमनोध्वगोविष
मविषयग्राध्वन्यस्यानिवेशवशीकृतः शिवप
दसुधासिंधुंदेवादवाप्यससादरंकिमपिहृद्वि

सं॰
त्रि॰
५

5

नोमज्जंमज्जंनिमज्जतिसांप्रतम् २० निरावरणचि
द्व्योमपरमामृतनिर्भरः नागाभिधानस्तदिदंचि
त्तसंतोषकंमयाकृ २१ इतिचित्तसंतोषत्रिं
शिकासमाप्तः ॥ ॥ ॥

ॐनमःशिवाय ॥ ॐदिविभूमौतथाकाशेब
हिरंतःस्वमेवविभुः योवभात्यवभासात्मा तस्मैसर्वा
त्मनेनमः १ अंतर्विलसितानंतशक्तित्रितय
गर्भिणे निरस्तसर्वकल्पायस्वभावमहसेनमः
२ नमःस्वानुभवग्राह्यप्रकाशानंदमूर्तये स
र्वभूतांतरस्थायनित्यायपरमात्मने ३ उन्मेषमा
त्रसंपन्नजगन्निर्माणकेलये नमःस्वतंत्रतोदार
परमैश्वर्यशालिने ४ परापरेणरूपेणस्थावरे
षुचरेषुच एकोप्यनेकतायातोभूतग्रामेषुयः
चरन् ५ गोपयन्महिमानंस्वंमायाशक्तितिरो
हितः प्राणपर्युष्टकाविष्टःपितृमातृदपुंस्त्रि
तः ६ स्थूलभूतशरीरस्थःकर्मपंजरयंत्रितः
सुखदुःखादिभाक्सोऽसंसारेपरिवर्तते ७
ततोदेहादिभिर्भावैर्मोहितःपरिकल्पितैः वि

सा
इच्छाज्ञानक्रियात्मगर्भे यस्य ॥
रूपामृतैर्यस्य
स्वतन्त्रतेवउ महत्वपरमैश्वर्य
देहादि
पुनः पुनर्जायते ॥
स्नेहक्रोधकामादिभिः मनोविकारैः ॥

स्वात्मनि जमात्मानमनात्मनि निमज्जति ८ मिथ्या
भिमानग्रस्तस्य रागोपहतचेतसः कोऽस्मीति चिन्त
या मर्शो मनागपि न जायते ९ अनात्मन्यात्मसंवि
त्तिलक्षणो ममतात्मकः अविद्याध्यासितस्यास्य
ग्रन्थिरस्योपचर्यते १० सतेनापहृतस्फारः सर्वज्ञ
त्वादिवैभवः इयत्तामात्रनिष्ठत्वसंकोचेनाभिभूय
ते ११ ममेदमित्यसंरुद्धैर्भावैर्व्यामिश्रयंस्तनुम्
पतत्यगाधे संयोगवियोगविषमे वटे १२ पञ्च
स्वेवर्तमानोपि भावेभावे मुहुर्मुहुः उद्भवस्थिति
संहारान्करोति निजशक्तिभिः १३ मायाविद्या
कलाकालरागनैयत्यमुद्रितः आविर्भावतिरो
भावैर्विदधाति गतागतम् १४ विकल्पाकुलित
स्यापि गोहे वृत्तिञ्जुषोपि वा पदेपदे चरत्यस्य चि
द्व्यक्तिरुपजायते १५ जडस्वभावा अप्यन्ते भावा
घटपटादयः प्रकाशरूपतां यान्ति तेन ते प्रति
बिम्बिताः १६ देशकालाकारभेदस्संविदो नहि
युज्यते तस्मादेकैव पूर्णाहं विमर्शात्मा चिदुच्य
ते १७ हृदयात्सर्वभूतानामग्नीषोमात्मकोस
दा प्राणापानावधश्चोर्ध्वं प्रेरयन्नवतिष्ठते १८

स्वा० ६

6

नादस्य सूक्ष्मगर्भतावा॥

स्फुरत्कुंडलिनीगर्भनादसूक्ष्मंतुनोदिता तन्मा
त्रैनेवपंचाशद्वर्णोच्चरतिमातृका १९ तन्मरी
चिचयोदारस्फारविस्फारितोजडः चेष्टतेविषये
ष्वन्तर्बहिष्करणविस्तरः २० यदोपलभतेबाह्या
न्विषयान्करणैःक्रमात् जाग्रद्रूपस्तदाजाग्र
दवस्थास्थोयमुच्यते २१ इंद्रियैरिंद्रियार्थेभ्य
विनेवानुभवोस्ययः प्राक्तनज्ञानसंस्कारात्स्वप्न
इत्यभिधीयते २२ यदात्रितयमप्येतदिंद्रिया
नभिभूतिकम् नैसंस्पृशतिसंलीनस्तदासोस्वा
पभाग्भवेत् २३ विकल्पेनापरामृष्टासंवित्तिः
केवलैवया तत्तुर्यंतत्परःपूर्णस्तुर्यातीतोनि
गद्यते २४ इत्येताभिरवस्थाभिरभिमानमदो
ल्वणे संसाररंगेसरसंप्रोन्नृष्टइवनृत्यति वि
स्मृतस्वात्मविभवंकथंचित्पारमेश्वरी शक्ति
स्तमनुगृह्णातिनिरपेक्षावचोदिता २६ यथा
र्ककरसंपर्काद्विकसत्येवपंकजम् भास्करस्य
नसापेक्षाप्रार्थितेवकमलस्यवा २७ तथैव
निरपेक्षैणपास्वरसोदितयाविभोः मोहनिद्रा

परमेश्वरेच्छयैवाभिव्यक्तया॥

यथानुभवति

प्रसक्तोऽपि पशुः प्राज्ञात्प्रबोधमने २८ यथा
कान्तुपमप्यंभस्त्तनोयानिप्रसन्नताम् कनक
स्पर्शसंयोगाच्छुद्धतामृच्छत्यपिपशुः २९
तथाप्रबोधितस्यास्य कोपिमोहविषापहः
विवेकस्स मुदेत्यंतर्हेयोपादेयलक्षणः ३०
कुतोहमागतः कोहं सर्वस्माने भवामि किम्
जन्म मृत्युभयं कस्य भवेतावानतो कथम् ३१
उपायाः के कथंहानि र्द्विविधस्यास्य कर्मणः
किं ज्ञेयं ज्ञायते केन कश्चतस्योपदेशकः ३२
शरीरे किं शरीरी कः कोभाका सुखदुःखयोः
किंविदित्वा निवर्तन्ते आवर्तन विवर्तन इत्यसा
वेतज्ज्ञानचर्वणैकउत्कहली चित्तस्य सहजो
दारोविचारः ऊहतेपदम् ३४ अनुप्रसस्य प्रका
शास्य भोगेभ्यो विरतस्यं च अल्पसंतोषपूर्णत
स्य वैराग्यमुपजायते ३५ निसर्गभंगुरत्वेन
भावानां परिभावयन् अनित्यतां ततः सार्थं
संबंधमधिगच्छति ३६ तीव्रसंसारकांतार
परिश्रान्तकदर्थितः वांछति शर्मस्निग्धच्छा।

कोऽपि स्वानुभवैक संवेद्यः ॥ ... त्वकान्तिरिक्तोहं ... उत्त्विरूपमुप... दयमिति ॥ ... हमेवनित्यवस्तु तत्त्वोत्पन्नदस्विलम नित्यमिति विवे कः ॥

कीदृशा मनसि कृतस्य ॥ उपायेन जन्मस... ... संसार विवेकचम कारणा भिमुकः ॥ विमि ... चारक्य ... ...निजरूप ...नस्य । विरक्तस्य

खा. पदार्थानां विचारयन् भावः
प. सततं
७

7

श्रारम्भमात्रे विषये

यामुस्यमनोमृगः ६९ आपातरमणीयेषुपदा
र्थेषुप्रियेष्वपि प्रायोवियोगधर्मत्वान्नस्निह्य
तिकदाचन ७० उत्सवैर्विभवैर्नास्यनिविडो
पिजायते मुकुरायातिनिर्वेदं भोगेषुक्षणभंगि
षु इंदीवरदलश्रेणिविभ्रमैर्मनिमोहनैः
कटाक्षैःपक्ष्मलाक्षीणांनास्यचाक्षिप्यतेमनः
अभिमानंसमुत्सृज्यविनयावनतस्सदा सा
धुसंगप्रसंगेनविनोदयतिमानसम् ७१ अ
निंद्यामपराधीनामुचितामकदर्थिताम् प्रा
णसंधारणमात्रांनिजवृत्तिंसमीहते ७२ आ
पन्नंदर्शनादेवप्रयातिकरुणार्द्रताम् चिंतय
त्यप्रियाण्येवमनसापिनकस्यचित् ७३ प्रस
न्नस्यापिकोपस्यवशंयातिनजातुचित् उदासी
नवदध्यास्तेस्वजनापुचितंगृहम् ७४ उच्चाटि
तइवोन्नीतइवोपगतधीरिव अपिश्लिष्टेषु व
पुष्पेषुकथंचित्प्रवर्तते ७५ स्वरूपप्राप्तिजि
ज्ञासुस्संसारच्छेदतत्परः अध्यात्मशास्त्र
संपन्नानाचार्याननुपसेवते ७६ सच्छास्त्र

स्वभावेनैवविषयवलात्

वैराग्यम्

निर्मलहृदयः जानाति

वणोद्भूतप्रबोधविशदाशयः बुद्धा(?)वबुध्यते स

म्यक्सदसद्वस्तुनिश्चयम् ४७ दुःखैकायत

नेनित्यमायासे क्षणभंगुरे जन्ममृत्युजराश्र

ले हर्षशोकभयाकुले ४८ संयोगविप्रयोगां

के रागद्वेषकदर्थिते तृत्पिपासापरिक्लीवे का

मक्रोधोपतापिते ४९ विकल्पकलनाजाल

कल्पिते मलिने जडे मानावमानसन्तानेर्ष्या

काष्ठाकृपणाचिते ५० आशापाशैकविरसे

नत्नोसोपाञ्चभौतिके निरुपादेयता हेये शरीरे

विचिकित्सिते लोकश्रुतेनानुभूतैः कुमार्याः सु

रतेयथा तथा स्वात्मसत्तायां प्रतीतिरुपजा

यते ५३ अस्त्येव चिच्चमत्कारसहजो दोसद

रः अनियत्रितसच्छक्तिप्रसरः परमेश्वरः ५२

स्फुरच्चराचरस्फारनानाकारपरिग्रहः परमा

त्मा निराकारो निर्विकारः परात्परः ५४ अन्तःस

मरसीभूतनिर्विकारनिजस्थितिः प्रतिभाद

र्शसंक्रान्तचित्रभुवनत्रयः ५५ परामृतर

सास्वादनिर्भरानन्दमन्थरः निराचारो विला

चिद्दर्पणे अभेदेन प्रतिबिम्बितं नानारूपं भुवनत्रयं यस्य सः

18

आवरणीकरणम् ग्रासीकृत

चारचरणैकांततत्पर: ५६ कवलीकृतदिग्देश
कालाकारादिकुलस्थन: सर्वत:प्रसरस्फारस्व
भूमाभूरिसदंतर: ५७ अनादिरव्ययो व्यापीकल
नातीतगोचर: निर्विकल्पो निराभासो निष्प्रप
चो निरंजन: निर्गुणो निष्क्रिय: शांतो निरात
को निरामय: निरुत्तरो निर्विचारो निराचारो नि
राकृति: नि:संशयो निस्तरंगो निर्लेपो निरा
श्रय: नित्यो निराशो निर्नाशो निराकान विस
र्जन: स्वसंवेदनसंवेद्यस्सदसद्भाववर्जि
त: स्वप्रकाश:पराकाश: प्रशांतो विशदाशु
य: अनादित्वात्पुराणोयमजडत्वाद्विश्वर:
भासक:स्वप्रकाशत्वाद्व्यापकत्वाच्चसर्वग: स्व
तंत्रो निरपेक्षित्वात्कृत्किमत्वादथेश्वर: निष्क्रिय
कृतकृत्यत्वादचिंत्यत्वाद्दुरासद: निस्पृह:प
रिपूर्णत्वादजडत्वात्प्रबोधक: निर्विकल्पो
मनस्कत्वादमूर्तत्वान्निरामय: ५८ निराभा
स:प्रशांतत्वात्त्रैलोक्ये सनोज्झित: सर्वा
न्यग्रहधर्मित्वात्परोप्यपरूपधृत् ५९ अनाख्यो
वागतीतत्वात्स्वतंत्रत्वादयंत्रित: दुर्विज्ञेयरह

निरर्गल:

दिक्कालादिनियमित: दिशुलरहित:
एतस्मात्स्वयत्र र:अशोनास्ति
उपलब्धप्रत्तविषयत्वात्सज्ज्ञावेनव त: विषयव्यवहार तत्सत्सद्भाववर्जि
व्यात्मसर्वकाला

× विकल्पजालनिर्मुक्तो विरागः शुद्धवासनः ८

अविद्यायाम्

स्वच्छत्वाद्धृदयस्योपि हरागः निरिच्छत्वादकामो
साक्षित्वात्सन्निधिमात्रेण असक्तत्वादुदासीनो
निर्मलत्वादनाहतः निष्कामत्वादसंकल्पो
नित्यसत्वादसंशयः अद्वयो विश्वरूपत्वाद
नंतत्वादथाव्ययः प्रमाणैः परिच्छिन्नत्वात्व
तंत्रत्वात्तथाविभुः एवंरूपापरिज्ञानाद्बंधरो
मोक्षदोन्यथा परमात्मेति तत्प्राप्तौ यतते चस
मुत्सुकः ततः सद्गुरुणा सम्यक् ब्रह्मैकत्वं
या ७ दृष्ट्यावलोकितः सम्यक् स्वसत्तामेव गा
हते दीप्तिर्दीप्तौ यथा खे खं पयसीव पयो प
यः ९८ तदा तदेकतायाति ब्रह्मणा ब्रह्मसंगतं
स्वरूपानुप्रविष्टोसावानंदैकघनः क्षणात्
देहभावं समुत्सृज्य किंचिदेवावशिष्यते नो
पायोपेयभावोत्र नाभावो न च भावना नाद
यालमयो यत्र धीश्चित्तं तस्मिन्विलीयते उन्मेषः
प्रशमो यस्मान्मनो यस्मिन्प्रशाम्यति तस्मि
न्समरसीभावं प्रयात्यानंदनिर्भरः अनुभूता
पि या व्यक्तं गिरा वक्तुं न युज्यते तां काम प्यात्म
संवेद्यां मननेचित्तमत्यतिम् यत्रास्थितो न नि

स्वसंवेद्यां ...पाठः

शक्नोते

रसाप्याद्यैविन्नय

प्राप्नोति

वेदमुपयाति कदाचन प्रतीनकालकलनस्य
न्मयत्वं प्रपद्यते गुरुशास्त्रैर्न भवजैर्निश्चित्य प्र
त्ययैस्त्रिभिः परिज्ञायात्मनात्मानं जीवन्मुक्तो
विजृंभते पीतादपरतामेत्य भावादिचेष्टनः पुनः मि
न मे बंधो न मे मोक्षः स्वस्वरूपस्य विद्यते सूक्ष्मदेहः
स्वैकसदनं शरीरं पांचभौतिकम् जायते कर्मसं
योगात्पुनरेव विनश्यति शरीराद्व्यतिरिक्तोयमा
त्मायमुपलभ्यते ८ तज्ज्ञानं सदसद्भ्यां मुक्ता
नेयदतोन्यथा यत्सानु गुरुणा सम्यगविद्या व्या
तिलक्षणः संकोचः क्रियते दूरे तदाह्येयं प्रका
शते सोहमात्मपरिज्ञानप्रशमिताशेषसंशयः
शरीरस्याप्यपि तद्धर्मैर्न लिप्ये कर्मभोगजैः रागा
दिहपरागोपि पुनः स्फटिकाश्मवत् मुक्त
श्चाव्यतिरिक्तोपि शरीरेह जलार्कवत् मय्यंत
रखिलं विश्वमंडोदरमयूरवत् देहस्थितो
प्यसक्तोहं ऊष्मौच्यधिवासवत् विश्वव्यापी
न मायायां वदंश्नौतौनां गरादिवत् स्वप्रकाशेन
मणिवत्कर्तानो कुंभकारवत् स्वसंवेद्योनस्तु

मेरोश्चेतनत्वात् कुंभकारस्योपादानसहकारिसापेक्षत्वात्॥ आत्मनः अविज्ञेयत्वेपि परिमेयत्वाविरहात्॥

ज्ञानप्रकाशरूपो देहादिव्यापारात्मक संकोचः॥ ज्ञेयस्य ज्ञानव्यवस्तुस भवति॥ = १

११ तत्काय देहैः स्वभावैः

नानावैचित्र्यमपि मयूराण्डरसवदेव रसीभूतं॥

सुखादिसंवेदनस्यअहन्ताचमत्कारविकलत्वात्

त्ववत्तद्देमानपरमाणुवत् वीतरागोनमुनिव
त्साक्षयोनेइन्द्रजालवत् मुनिभिर्नियमद्वीणोह
पस्पङ्गिः परंतपः अविज्ञानरहस्यायंकस्यकोटि
प्रातेरपि अयमेवसदासङ्गिःमायतेस्तुतिविलरैः
मार्गैरनेकैर्विद्वद्भिरयमेवोपगम्यते अज्ञानांधत
मच्छन्नदृग्भिर्मायामलीमसैः हृदयस्थोप्ययंके
श्चिन्कचिदन्यत्रमृग्यते ॥ ८९ ॥ उक्तिप्रपंचैर्विविधै
र्भेदोपहतबुद्धिभिः हेतुवादैकनिष्ठत्वादयमेव
विकल्प्यते आत्मानकश्चिदेवात्रपरमार्थेहिवि
द्यते विकारोभूतसंयोगाज्जायतेचेतनामयः भू
तात्मकेशरीरेस्मिन्नातेकस्माद्विलीनताम् ततो
नकश्चिदस्तीतिचार्वाकाः प्रतिपेदिरे गुणात्मि
कयंप्रकृतिः पुरुषश्चाप्यणोर्गुणः तयोःपृथग्वि
वेकोयामोक्षोसाविति कापिलाः क्षणिकज्ञान
संतानवादिनः सौगतास्त्वये आत्मानकश्चिद
स्तीतिजगुराशून्यवुद्धयः कर्तृप्रयोजितान्ये
वचेष्टन्तेकरणानियत् ततःप्रयोजकस्तेषांकश्चि
देवानुमीयते ॥ ९० ॥ समवायेततःसहजैर्यदात्मुनव

स्वा॰
प्रा॰
९०

10

प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते
तेषामपि परो जीवः स एव परमेश्वरः ॥

स्वादिभिः

भिर्गुणैः तदेवमुक्तिरित्यस्मिन्पक्षे नैयायिकाः स्थि
ताः अहंताप्रत्यया ग्राह्यः सर्वोपाधितिरस्कृतः
शुभाशुभैकफलभावक्त्वाक्तो मीमांसकैरयम्
इत्येवमादिमत्तर्कभिन्नप्रमातृभिः सदा वादिभिः
स्वप्रमाणैकसिद्धोप्येष प्रमीयते सर्वाहंभाव
संपूर्णो रोधकश्चिन्महेश्वरः यदि न स्यात्तन्मते स्व
प्रामाण्यं स्थापयेत्कः १०॥ विमर्शानुभवोक्तिभिः
इहंताविस्मृतीस्मृतिः पूर्वापरानुसंधानं कस्य
स्यादीश्वरं विना ११ तस्मादनादिसंसिद्धो विश्वस्य
वस्तुपदं हितः केन शक्यो निराकर्तुं विकल्पसहरो
दयः विकल्पनिवहत्यागात्सर्वाहंभावभाव
नात् स्वानुभूत्येकशीलत्वात्प्राप्यते परमं प
दम् च परानंदैकविश्रान्तमध्यमार्गीवलं
बनात् भेदवस्तूपसंहारात्प्राप्यते परमं पदम्
इत्याम्नायशिवसद्भावभावगर्भस्य हेतुना शान्त
कौमिहानेनेदं कृतं स्वात्मोपलब्धये १४ इति
स्वात्मोपलब्धिप्रातकं संपूर्णम् ॐ तत्सत् प
रब्रह्मणे नमः ॥ शुभमस्तु सर्वजगताम्

प्रमाणानां तदधीनसिद्धिकत्वात्

अशेषत्वेन परामर्शनम् ॥

प्रत्यक्षो स्य जगतः इति सत्ताक्तिर्भवितः शुद्धस्वप्रसरोदयः इति पाठः

काश्यात्मैश्वरतापदमित्युक्तेः ॥

जीवेनव्रलितंप्रेमसखिमूढेनवेधसा। लब्धुंजीवोयथोकेठंत
रुप्रेमहृदिस्थितम्। स्वप्रकाशमनिर्वाच्यमात्माद्वैतकं
परम्। विकल्पातीतमानन्दंप्रेमैवब्रह्मकेवलम्।
ग्रहोपम्यानमुत्सृज्यविषयेपरिमर्दयन्। हृदीश्वरोहृ
दिस्थित्वाहृदयंननिरुद्धवान्। रागगोर्भ्यां

ॐ श्रीगणेशाय नमः ॐ श्रीकुमार उवाच
ॐ अल्पविज्ञानरागेषु अग्निहोत्रं न कुर्वते ते
षां प्राणाग्निहोत्रेण प्रसादं कुरु शूलभृत्
शरीरेस्मिन्कत्वग्नयः कोयजमानः कापत्नी
कऋत्विक् कोध्वर्युः कोहोता कउद्गाता
कउपद्रष्टा कः प्रतिप्रस्थाता कः स्नातकः
कोरुद्रः कारुद्राणी किंहविर्धानं किमि
धनं कः कलशः काप्रापः कोर्चिः किम
ग्निपात्रं कोगंधः किंपुष्पं कोधूपः कोदी
पः कोवेदिकाग्निर्वेदिः किमिध्मम् के
परिधयः कोयूपः कारशिः कश्चमसः
कः पशुः कोहोमः कारशाना कउपांया
मः कोस्वक्षवो कः पुरोडाशः कानिभु
वनानि केलोकाः कानिलोकोनराणि
काआहुतयः कतमादेवताः प्रीताभवं
ति इत्येतन्मष्टिनंतभगवन्वक्तुमर्हसि १

सि श्रीईश्वरउवाच अतिगुह्यतरं प्रवक्ष्ये
म्यपापोहितं परं यन्नकस्यचिदाख्यातं सु
रेणु स्वामिषण्मुख इदं रहस्यं परमं नदे
यं यस्य कस्यचित् संपरीक्ष्य तु दातव्यं गुरु
देवाग्नि पूजके अस्मिन्शरीरे समाग्रघो
भवति श्रुवेचाहवनीयाग्निः दक्षिणा
ग्निर्मनसि स्थितः हृदये गार्हपत्याग्निः
नाभ्यां सोमः समस्थितः उत्तराग्निर्भ्रुवोर्म
ध्ये ऊर्ध्वाग्निर्हृदयान्तरे अधोग्निः पादयो
र्मध्ये इति समाग्नयः स्थिताः एतेषां तु श
रीरे पुरुषो यजमानः प्रकृतिः पत्नी
प्राणाग्निविक् प्राणोऽध्वर्युः अपानो होता
समान उद्गाता उदान उपद्रष्टा व्यानः
प्रतिप्रस्थाता मनः स्नातकः आत्मा इन्द्रः
न्सेंज्ञाली हविर्धानं मूलमंत्रः वह्निः
सूर्यः चयो होमः मूर्धा द्रोणः कलशः

शोणितमापः केशादर्भाः ब्रह्मनाडिराज्य
स्थालिका उपस्थकंग्रहाः दन्ताग्रावाः कपा
लमस्थिपात्रं परमाविर्भूपः परमात्मासीपः
तन्मात्रःपुष्पं प्राणोगंधः नासावेदिः जि
ह्वान्तर्वेदिः इध्ममस्थीनि अंगुलिपरिध
यः श्रोत्रेचमसः अहंकारोयूपः अरणिः
प्राणप्राशित्रः रसनातुष्टिः ऋत्वोउपया
मः नेत्रेपुरोडाशः चित्तंपशुः हस्तौस्रु
क्स्रुचौ इंद्रियाणिआज्याहुतयः अनेनक्रम
णविद्वान्यदिजुहोति अयत्रयाविंश
हेवकोन्नःतत्राभवति यएवंवेत्तिस
वेदवित् सद्याहिताग्निर्दैवकव्ययोःसम
र्थः तस्माच्छरीरेयष्टुंसर्वादेवताइष्टा
भवंति ॥ अतःपरंप्रवक्ष्यामिस्वात्मस्ना
नमनुत्तमं तानिनोयेनमुच्यंतेघोरात्सं
सारबंधनात् अत्रशरीरेपादयोर्विष्णुः

प्रा॰
हो॰
२

८

जंघयोर्मरुतः जान्वोः पृथिवी ऊर्वोर्मित्रावरु
णौ कट्यामिन्द्राग्नी गुह्ये वासुः लिंगे रुद्रः
वस्तिशीर्षे ऊर्जावीरः नाभ्यामग्निः उदरे समु
द्राः पृष्ठे नागाः पार्श्वयोर्हरिः पृष्ठे पित
रः गल्हयोर्धर्माधर्मौ नासाग्रे त्वष्टा बाह्वो
र्वायुः ग्रीवायां कालरात्रिः हस्तयोरिन्द्रः
हस्ततले क्रोधः कुण्डलेषु सर्पाः नखेषु नक्ष
त्राणि जिह्वायां सरस्वती जान्वोर्गुरुः दक्षि
णे स्कन्धे यमः वामस्कन्धे बृहस्पतिः
दन्तेषु मरुतः चक्षुषोश्चन्द्रादित्यौ श्रोत्रयो
र्दिशः नासापुटयोरश्विनौ मुखप्रान्ते
षु वसवः हृदये ब्रह्मा भ्रुवोर्मध्ये नारा
यणः शिरसि महेश्वरः तस्योपरि ब्रह्माक्षः
सार्धत्रिस्रः रोमकोट्यः तारका भवन्ति तत्र
नाभिप्रभृति शिरोन्तं यावत् सप्तलोकाः क
ल्पिताः नाभ्यां भूर्लोकः हृदये भुवर्लोकः

कंठेस्वर्लोकः जठरेमहोलोकः पृष्ठेजनलो
कः ललाटेतपोलोकः मूर्ध्निसत्यलोकः
स्त्रासनातलंसुमालंग्रीवातलेचनभस्तलं निता
लेचस्तनातलेचरसातलमनेनकं नाभ्यधस्ता
त्तनाभासंज्येतलनालसंज्ञितं ऊरुप्रदेशे
श्रीनालेगुल्फदेशेरसातलं पादयोश्चत
थैवान्यःपातालाःसप्तसंज्ञिताः जंबुद्वीपस्तु
विज्ञस्याद्धृतिःकौमायेसंज्ञितः ऊरुद्वीप
श्वचित्रातःक्रौंचद्वीपस्तुहृत्कृतिः श्राद्धांते
सिंहलद्वीपोमनःपुष्करसंज्ञितः बुद्धिःशा
कलद्वीपःस्याद्द्वीपाःसप्तप्रतिष्ठिताः यथा
ह्यस्मिन्शरीरेतुसप्तनद्योवहंतिच तथैवे
वसमासेनशृणुवक्ष्यामिषण्मुख गंगाच
शिरसिप्रोक्ताललाटेसिंधुरेवच नासायेच
वितस्तातुकंठेस्याद्धनर्मदाका हृदयेयमु
नाप्रोक्तानाभ्यांचैवसरस्वती ऐरावतीतु

प्रा. हो. च

३

गुह्यस्याधिष्ठानस्याधः स्थिता सर्वतीर्थम
यं स्मृतं शरीरमधुना शृणु ब्रह्मरंध्रे ब्रह्म
तीर्थं केदारं शिरसि स्थितं वाराणसी लला
टे तु भ्रुवोर्मध्ये तु मानसं नासापुटे प्रया
गं तु हृदये पुष्करं तथा नाभ्यां कनखलं चै
व सर्वतीर्थानि चात्मनि ब्रह्मावर्तं स्वदेह
स्थे तीर्थान्येतानि देहिनः देवतीर्थं ब्रह्मती
र्थं वायुतीर्थमतः परं सोमतीर्थमग्निती
र्थं शरीरे तु सदा स्थितं मतितीर्थं दयाती
र्थं तीर्थमिन्द्रियनिग्रहः सर्वभूतदयाती
र्थं नान्यत्तीर्थं प्रकल्पयेत् तीर्थानामधिकं ती
र्थं यत्र भावो हि निर्मलः हृदये मलमाश्रि
त्य चेन्द्रादि देवाश्च तिष्ठतः यावद्धिः सत्त्वमा
श्रित्याय यन्मनः सत्त्वचेतसः श्रुतिश्चैव तदह
कारे देवाः कर्मेन्द्रियाणि च सर्वे देवमया
स्त्वात्मा सर्वतीर्थमयस्तथा तस्मात्सर्वप्र

यत्नेन आत्मस्थमर्चयेत्सदा आत्मस्थं येन रू
पं तेनात्मानं चार्चयन्ति ये मूढाश्चायान्ति रौरवा
न् अन्यदेवार्चने रताः न ते विदन्ति तं देवं स
र्वव्यापिनमीश्वरं जन्मनापशवस्तेहि इति
सत्यं वदाम्यहं नार्चयेन्मृन्मयं लिंगं न शैलं
न च कांचनं अर्चयेद्देहजं लिंगं भुक्तिमुक्ति
फलप्रदं स्वदेहायतनं लिंगं मनो यत्र स्वयं
प्रभुः हृत्पीठकर्णिकामध्ये तत्र लिंगं प्र
पूजयेत् हृत्पीठं भद्रपीठं च सर्वरत्नवि
राजितं नेतावाचैव ध्यानतः सर्वपाप
हृदयो भवेत् अमण्डलेन भोक्तव्यं न च दैवा
मपाणिना नेत्रोपकृष्टिरविष्णुवमहद्यत्र
कदाचन विष्णुः सोमस्तु सूर्यस्तु रुद्रनाश
नः शचीपतिः मंडलादुपजीवन्ति तस्मा
द्वीनमंडलं अश्नीयात्तथानाशु क्रूर
कर्माणि राक्षसाः बलमन्नस्य हिंसन्ति म

शा॰ हृ॰ ५

ऽलेनविवर्जिताः मंडलानि प्रकुर्वीत चतुरस्रं
त्रिकोणकं अमृतं यपरीमालं विस्तीर्णं मुनि
पुंगव नरवेन कुर्वीत भूत्वा काष्ठेन व्याधि
मिच्छति अप्रमनाधने हानिः स्यान्न्यूनमयेन
कान्तिर्भवेत् अतः परं प्रवक्ष्यामि आत्मता
नैविधानकं यज्ञात्वा मुच्यते जंतुर्घोरात्सं
सारबंधनात् अखंडं शोधयेत्पात्रं प्रणव
णामनेन दहेत् सकलं हंसमंत्रेण शरीरं भि
नयेद्बुधः हृदिस्थाने स्थिते कुंडे प्रणवेणे
वज्ञापयेत् सोमसूर्याग्निकुंडेतु मध्यस्थं र
ज्योतिरूतमं हंसो हंसादरो देवो जीवादि
त्वस्तु सुव्रतः नवज्वालाकलापेन भासये
त्राभिमंडलं एषा ज्वाला प्रधाना स्याज्जिह्वा
ग्रंधानि सर्वदा जठराग्निर्विविध्योसौ पा
वकः परमेश्वरः अनंगयेंडुभ्यावहाद
प्रीतेन समाहितः प्राणयामाद्भूताः पंचवा
ऊयाहृदिपावके पात्रे सम्पूज्य तत्पात्रेरव

केनैवशोषयेत् पूरकेनविधिज्ञेनव्योमरन्ध्रंव
पगनन आप्यायकःस्मृतोह्ययः पूर्णेनाप्य
ऊमेनवा प्रोल्लिविलद्दलंविप्रः सिद्धिका
मस्तुकर्मसु अतःपरंप्रवक्ष्यामिकलाषो
डशासंयुतः मेत्रयेद्ध्रुकमध्येतुसाह्यातेन
ऊतीर्भवेत नाभिमध्येस्मरेल्लिङ्डवज्रवज्री
डमेखला नन्मध्येसंस्थितेज्योतिःशिखा
भिःसर्वभद्रकः पद्मसंपुटकेसेनज्वाला
मालानपुष्टिते द्वासप्ततिसहस्त्राणिना
ड्यःपरिकीर्तिताः प्रत्रेसोमःस्त्रवोहस्रोद
तासर्वोजयेद्धरिं बालीसमाधिमास्थाय
भेकेस्वत्रवतुर्विधं प्राणोपानःसमानश्च
उदानोव्यानएवच इत्येतेवायवःपंचशरी
रेषुप्रतिष्ठिता प्राणस्तद्ध्रदयेस्थानेअपा
नस्तुगुदेसमानोनाभिदेशस्थउदा
नःकंठमाश्रितः पंचमस्तत्रविज्ञेयोव्यानः
सर्वांगसंस्थितः एतेषांजऊयादतंत्रशरीरे

मंत्रयेद्विजः पंचैस्तैर्मंत्रैस्तुनमःस्यात्तुलोकेऽस
चराचरम् प्राणमंत्रमूर्तेभोक्ते प्राणायस्वा
हा व्यानायस्वाहा अपानायस्वाहा समाना
यस्वाहा उदानायस्वाहा कनीनादीयनेप्रा
णेअपानेमध्यानामिका समानेमध्यमादे
या उदानेतर्जनीस्मृता पंचभिस्त्वेवव्याना
यस्त्वावास्वनोयथाहविः योविष्णुःसोभ
वनस्यगोप्रायेनेदंविश्वंसचराचरंच भु
भाशुभकर्मफलस्यगोप्तानस्मैनमः प्राण
कृताप्राणायस्वाहा राजीववर्णसदृशः प्रा
णोनामप्रकीर्तितः तस्यापस्तात्समानस्तु
गोक्षीरसदृशप्रभः सावित्रीवेदरूपत्वा
रःसोगात्सुसपद्क्रमाः गेषध्यःसवन
स्पतयःसोमभास्करतारकाः तेनात्रेनहि
तप्राःस्युःप्राणयोनकृतिप्रजाः अपानेज्ञ
कृतियेतद्द्वितीयामाकृतिंद्विजाः अथि

नैमरुतोविश्वेधर्मोदेवाःसवासवाः प्रजाप
तिःकुमारस्कन्दगन्धर्वकिंनराः तेनानेनतृ
तमाःस्वरूपानेनकृतियदि समानेनकृते
येनतृतीयामाकृतिंद्विजाः तेननागाःस
मुद्राश्चसरितश्चैवपर्वताः ऋषयःपितर
श्चैवसर्वेदेवगणास्तथा तेनाचेनचतुर्माः
सःसमानेनकृतेयदि उमानेनकृतेयेन
चतुर्थीमाकृतिंद्विजाः तेनाहंवृषभश्चै(
वस्कंदोनंदिगणेश्वरो उमाब्रह्माचरुद्र
श्चसर्वेदेवाःसवासवाः तेनाचेनचतु
र्माःसुरसानेनकृतेयदि ध्यानेनचकृते
येनपंचमीमाकृतिंद्विजाः तेनग्रहाश्चना
गश्चनक्षत्राणिनश्चैवच सप्तद्वीपाःसप्त
ताराःसमस्तोकालश्चैवच ब्रह्मादिस्तं
बपर्यंतेनेनसंतर्पितंभवेत् अनेनक्रम
योगेनभुंजेतेयेनमत्रिणः सर्वपापविनि

प्रा॰ ति॰ ९

6

मेत्मनः परेणकृत्यनामयम् पंचवाय्वात्म
केपिंडमेकाकृत्याप्रपूरयेत् मूत्रमंत्र
सपुच्छार्यदानारंचोद्धरेभवात श्रुत्वेक्ष
ङ्क्कैवाह सोम्बालाजिह्वासरस्वती घ्राण
नीमुप्रसादस्वानिनिरालंबेकृताशने यो
भुक्तेमेत्रविष्टिश्रउद्धरेत्मकलंकृते पित्
णानस्यसर्वैषांतप्रिभवतिप्राणाख्यानी प
पंचविधिनोविषस्तत्रमप्राणिसंस्कृते
सहर्याकित्विषोभूत्वाद्यनेमोदमवाप्र
यात् प्राणोनामश्वासोच्छ्वासोविजंभनि
निष्ठीवतिव्यवहारप्रवर्तकोभवति
अपानोनामाधोनियनशुक्रमूत्रपुरीषा
णुत्सृजति अपानयनाधोगमनादपा
नः समानोनामचतुर्विधः साहारंभुक्त
पीतंजीर्णंसमानयतिसमीकरणात्समा
नः स्थापनाद्वा उदानोनामहिक्काशब्द

ऋर्द्धिस्फारकामश्वासोक्रांतिश्चोदनः ऊर्ध्व
गमनाद्वाउदानः व्यानोनामप्रसारणाकुं
चनोलंघनप्लवनगमनशमनोस्थापनह
मनगीननृत्यवादित्राभिलाषचरितप्रव
र्तकोभवति व्यापनात् व्यायच्छणार्थ
व्यानः सोलोद्यादित्यदेवतः इत्येतादे
वताः हृथव्याणाग्निहोत्रंयतेनऊर्ध्वदे
वविधानतः सर्वलोकविनिर्मुक्तोब्रह्म
लोकेमहीयते अनेनविधिनापञ्चभूते
ष्वत्रसमाहितः तेनतृप्तेनतृप्यंतेदेव
ताःपितृभिःसह रुद्रिस्यादेवताःसर्वा
रुद्रिगणःप्रतिष्ठितः चतुर्विंशतितत्त्वा
नि पुरुषोरुद्रपरः नाभेरूर्ध्वमथस्ता
द्वकंठयस्ताच्छडंगुले रुद्रयंनद्विजा
नीयाद्विश्वस्यायतनंमहत् योग्निस्तप
तिचाग्निस्त्वेकस्मिंछानिसमथा त्रैलोक्यं

प्रा॰ हो॰
३

7

व्यापितं तेन यज्जंते ब्रह्मवादिनः विप्रादि
श्वपचांतानां भूतानां हि स्थितो नसः न
स्यैतानाश्राकृतीर्दृश्या नृभिर्भवति चाहृया
सर्वभूतस्थितस्त्वेव समाधिः परमेश्वरः
तस्मैप्रसीयते श्चत्रं समपात्रं सर्व मद्रकः
देहाग्निं नर्मये ऽग्निदत्वा न्यथा काष्ठदाहृ
कः प्रभ्वनतास्याभगवान्यथा निष्ठेतेनल
नीपितेयेन वै सम्यक्कृतं तेनाहुतं भवेत्
सयस्याभिक्षां गृह्णाति भुंजन्नेव गृहे वसे
त आसममकृतं तस्य उक्तरेक्षरकारणं वा
त ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवांत्य
जाश्चये भुंजानानोपलिप्येयस्फाटिकेपा
त्रना यथा चैडालगृहे वासो वा सर्वावस्था
गतोपि वा एवं तत्कृपायस्तु सततं प्राप्त
वत्स्विष्ट कृतात्तुष्टरतेन्याता त्यस्मात्सर्वात्रुषा
पराद्य प्रत्रंविश्रमयेध्यायेत्सोत्रलांलमे

वच भोक्तामहेश्वरं ध्यायेत्सर्वव्यापिनमव्य
यं ततः स्वभस्मभस्मना पुनाति स्वगात्रमम
नेपुनाति स्वयं पुनाति इष्टप्रतिग्रहं पुना
ति कृतघ्नं पुनाति सर्वपातकं पुनाति का
मिकं मानसं यच्च वाचिकं यत्कृतं भवेत्
तत्सर्वं दहमयत्याशु प्राणाग्नौ जुहुयाद्यदि
देयं ब्रह्मविदे दानं भक्तिश्रद्धापरेण तु पि
तरस्तर्पितास्तेन यदि शोरव नामिनः हेम
कोटिप्रानं पुण्यं यो ददाति दिने दिने शि
वज्ञानविदे ब्राह्मं तस्मं वाधिकं भवेत्
विमलज्ञानसलिलैः स्नायाद्यदि दिने दिने
तस्मात्रं सर्वपापानां तारणं परमं स्मृतं ॥
इति श्रीमहेश्वरेण कुमारस्य प्रोक्तं प्राणाग्
निहोत्रं सम्पूर्णं समाप्तम् ॥ गेष्वेयास्तु
एवमेव जनुनीतेनगीतं भगवद्यशः नजा
नेजानकी जानेयमाकाने किमुत्तरम् ॥

प्रा॰
हो॰
८

8

श्याणेतोऽरमकः सष्टिः प्रजापतेरेव रेतो देवादेगानां रेतोवर्षं वर्षस्य रेतो ओषधयः ओषधे रेतोऽन्नमन्नस्य रेतो रेतः सोऽरेतः प्रजा इति श्रुतेः प्राकाशकृतिः सम्यगादित्यमुपतिष्ठते गादित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति ॥

प्रमातॄणां कौ विधिनिषेधकणापदे स्यातां येन तेनः
परमात्मशिवः प्रमाणम् सर्वान्तरः स खलु तत्र
विधिनिषेधकर्तुं हि मेने विहितेन च विभुर्निषेधम्
शुद्ध्यापहारहृतं चेदनेवं शानादन्न तु प्रमादमधुम्
त्तव प्रभाताः भावाः सहस्रमपि जागरतु तत्वेद
न्तः प्रकृत्वादिनी विजयते परचिल्लसेका ॥ ४

हंसाः पत्रस्थिगगनेषु विसार्यपक्षौ स्वोऽसर्वदेव
विलसमानसरोजहंस भूत्यद्भुतातव गतिर्गगने
पेऽस्मिन्निद्रेपद्मनामयपद्युगं विहाय ॥ शिव

ॐ यदयमनुत्तरमूर्तिर्निजेच्छयाखिलमिदं जग
त्स्रष्टुं पस्पन्दे स स्पन्दः प्रथमः शिव
तत्त्वमुच्यते तज्ज्ञैः ॥

त्रिपुरा श्रीवागेश्वरी तारा च भुवनेश्वरी मातंगी शारिका राज्ञा भीमा ज्वालामुखी तथा
दशविद्या भद्रकाली तुरी च छिन्नमस्तिका दक्षिणकालिका श्यामा कनिकाकेश सुन्दरी एतासां
मूलमंत्रं तु योजिता षोडशाक्षरी ॥

ॐ श्रीगणेशाय नमः ॐ अथोच्यते ब्रह्मविद्या
सद्यः प्रत्ययदायिनी शिवः श्रीभूतिराजो या
मस्मभ्यं प्रत्यपादयत् १ सर्वेषामेव भूतानां
मरणे समुपस्थिते यया पठितयोत्क्रम्य जी
वो याति निरंजनं २ यान्तानितोपि समलो
ह्रत्वस्यापि ऋनासती शाणादिके दजोमृ
तुमथ्यांसयोबधोहति ३ यामाकर्ण्य
महामोहविवशोपि कमाङ्गनः प्रबोधं
वक्तां मुख्यमभ्येति रभसात्स्वयं ४ ॐ
ह्रीं ह्रूं फ्रें हसक्षमलवरयऊं परमपदात्व
मिहागाः सनातनस्त्वं जहीहि देहान्तं पा
दांगुष्ठादि विभो निबंधनं बंधनं छ्रुये ये १
यें उत्क्रान्ते जातु गतं जंतुस्संबंधनं तथाम
हे जहिहि परमगुरमध्यहृत्पद्मानं सम
त्रिह ये २ यें हसहयग्रीवविभो सदा
शिवस्त्वं परोसि जीवात्मः रविसोमवह्नि

ॐ. १

मेवद्धविंदुदेहोहहहहमस्मुत्क्राम ॥ ३ ॥
हंसमहामंत्रमयः सनातनस्त्वं सुभासुभो
पेही मंडलमध्यनिविष्टः बोधमयाहि दे
वतादेह ॥ ४ ॥ प्रतानुं मेवद्धः प्रबो
धितो निहदेवादे ॥ ५ ॥ व्रजनालसा
क्रमतं स्याङ्कुवरह्यहि तं महाद्वारं प्राप्य
प्रयाहि हं हो हो वावामदेवदेवदेवपदं
॥ ६ ॥ ग्रंथीश्वरपरमात्मन्नानमहाना
लरंध्रमासाद्य उत्क्रम हे हे हे श्वरनिरंज
नेशिवपदं प्रयाह्याशु ॥ ७ ॥ प्राक्रम्य
मध्यमार्गं प्राणापानौ समाहृत्य धर्माय
मौत्यक्का नारायणयाहि शांतोनं ॥ ८ ॥
हे ब्रह्मन्नु हे विस्मो रुद्र शिवो सि वासुदेव
त्वं ग्रंथीयो मसनातन मूर्तिं डंजहिहि
हे महाकाश ॥ ९ ॥ मंगुष्टमात्रमूल
मतमावरणंजहिहि हे महासूक्ष्म ॥ १० ॥

ऐं पुरुषत्वप्रकृतिमयैर्बहोहंकारतंतनावं
धैः प्रभवामवतिन्योऽहिनुपरमात्मस्वज
सतगमधाने ऐं ११ ऐं ह्रीं ह्रूं सेत्रशारीरम
विलेखमाश्रुतमेहिदेहांते ऐं १२ ऐं तद्धि
देगुणभूतमयेन्यजसवषाहोशिकेपिंडे ऐं
१३ ऐं मादेहभूतमयेप्रभृस्यतांप्राप्नुते
महादेहे ऐं १४ ऐं मंडलममलमनंते
त्रिधास्थितेगक्तभिन्नेनन ऐं १५ सकले
पंचकलविद्यास्यात्वंचदशाभिःस्फुटैः वाक्यैः
पंचादशगतस्यानिष्कलापरिकीर्त्यते १६
प्रतिवाक्यंपयार्पेतबोजिनापरिपठ्यते
तारोमायावेदकलामातृकारोनवात्मकः
इतिपंचादशराणिस्युःप्रोक्तव्याप्यत्रमारतः
इतिश्रीतंत्रज्ञानोक्तेकालीविद्यासमाप्ता ॥

मैं० २

ॐ नमः शिवाय ॐ ह्रां ईशानवरं ध्रगाष्टदयगो
वाक्त्वंगोणिश्रोमनः शाक्तापायुरवकः समीरदृशा
केत्वाधारशक्त्यात्मकम् चिद्देवोथ्यविमर्शश
क्तिसहितः षाड्गुण्यमेणावलिर्लोकेशाः करणा
नियमस्वमहिमानंनेत्रनाथं नमः ॥ आधारे
गणपतये स्वाधिष्ठानेकुमाराय अध्येष्ठि
ये नासारंध्रयोः सरस्वत्यै विश्वकर्मणे चक्षु
र्भ्यां नंदिमहाकालौ कर्णरंध्रे गंगायमुने स
मीरदशकं प्राणापानसमानोदानव्यानना
गकूर्मकृकरदेवदत्तधनंजयाः एवमाधार
शक्त्यात्मकं चिद्देवोथ्यविमर्शशक्तिसहितः
वृद्धियुक्तः षाड्गुण्यमेणावलिः सर्वतःशिवा
य हृदयाय नमः सर्वतश्शिवाय शिरसे
स्वाहा अनादिबोधशिवाय शिखायै वषट्
स्वतंत्रशिवाय कवचाय हुं अलुप्तशक्तिशिवा
य नेत्राभ्यां वौषट् अनंतशक्तिशिवाय अस्त्रा

यफट् विभोरिमानिबडंगानि महेश्वरस्य गुणाः
लोकेशाः करणानि बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षु
र्जिह्वाघ्राणेति वाक्पाणिपादपायूपस्थाश्चेति
यस्य महिमानेनेत्रनाथेस्तमः इहिपरमेश्व
रः आत्मापरमात्मा चेति परमेश्वरः विष्णुर्ब्र
ह्मा शिवः सूर्यः पार्वती चेन्द्रमाः महेशादः
श्रीपतिः अनादिदेवः आत्माधिदेवः एकः
ग्रहवः यस्मिन्सर्वे गतः सर्वपः सर्वं सर्वतश्च
यः यश्च सर्वमयानित्यं नमस्ते सर्वात्मने नमः
भजनापीठनाचैव सकलानि कलानया
पंचप्रकार प्रजां च यो जानाति स प्रमकः
भजनाहार प्रजास्याङ्गरूपं क्रिक्रमानिना
पीठजासन पदादि मन्त्रेण सहितानाया
सकलाविंशत्रयाचनिकलावाहिरंतरा ॥

3

------ पराप्रजाप्रकीर्तिता ॥

चेऽक्रमेण परितभोगमोद्दोमेदक्रमेणमदनोद
यमंगनानाम् दाराक्रमेणवक्त्रप्राक् पराजयस्य
---- परिवर्तनमर्पीसिद्धिः ॥

इत्युक्तिरियं परमेश्वरं प्रतिकायवाङ्मनसां तदेकविषयतानियोजनमात्रलक्षणा
सा नमस्कारस्यार्थः साच तथा कर्तुमुचिता प्रामाणिकस्य भवति यदि स
र्वतो नमस्करणीयस्योत्कर्षं पश्येत् अन्यथा हि युक्तिमपरामृशतो पर
मार्थरूपेपि नमस्कारो यतस्य सांसारिकपशुजनमध्यपातित्वमेव यथोक्तं
न विंदंति परं देवं विद्यारागेन रंजिता इति तावति हि माथीयास्तु इव विद्यारा
गकलासंचार्यमाणस्य पशुत्वमेव इतरापेक्षयानु कतिपया द्योतीर्णत
यास्मदुत्कर्षोपि स्यात् न तु कस्य नाम कारणैरित्यादि इति श्रीमद्वि
द्याधिपतिना प्रोक्तं एतच्चागमकांडे निरूपयिष्यामः तस्मात्रिविलोत्क
र्षपरामर्शनमर्पितत्रल्लीकार्यं यच्चप्पायातत्तद्धेश्वरशक्तिपातस्यलय
मेवेयमियतीपरमशिवमभिरम्योति हृदयगोचरं तत्कात्मीयः पुरुष
कारः कोपि निर्वहति सर्वस्य तस्य मायामयत्वेनावधतमी मुख्यस्य मायी
यं स्फुरत्प्रकाशस्य प्रतिवंदितं प्रत्युपायतानुपपत्तेः तथापि तदेव तथावि
धं रूपं प्रत्योपाख्याक्रमेण स्वात्मपरावभास भावजिगमयिषयानिः शे
षोत्कर्षविशेषाभिधायि जयत्यादि शब्दानुवेधेन परामर्शनीयमिति नम
स्कारे जयत्यर्थ आक्षेप्यः ॥ जयपरोदीरणेपि तात्पर्यमस्मदुत्कर्षाभिप्रा
लिनि स्वात्मानमप्रकाश्यावीणस्य तटस्थस्य परमनात्मोपकारित्वं इत्यर्थो
दिसएवावध्यपमभ्यंतरो शिवः ग्रंथकृता तादृक् प्रणामआश्रितः यत्राय
मपि निगरपरामृष्टमेव एतच्चसदार्थ व्याख्यानेवसरे प्रकटीभविष्यति ॥

परतां परमां देवीं परात्परतरां शिवां वैखरी मध्यमारूपां पश्यंती च सदा नुमः
ज्ञानरूपी पराज्ञेया पश्यंतीदर्शिना द्वि हि मध्यमास्मृतिनिर्घोषा वैखरी
स्फुटतां व्रजेत् पिंडनादिपीठस्य शक्ति परा =॥ रहखए ०

०स सोः० हकारांतं ँ ० एष्यां ॐ भूर्भुवःस्वरित्यो
अकारादि हशक्तितत्त्वं रं उ मायां क्त्वा तत्सवितुरिति
अ ए ओ ख्वें उ प्राज्ञां सावित्रीमनुब्रूयात्
शिवतत्त्व ॐ भूर्भुवःस्वाहास
उ ॥=॥ कालविश्वंवेत्ति दं

ब्रह्मइत्यर्थः इत्युक्त्वा इत्यं विमृषयेत् तत्सवितुरित्यादि सा विज्ञीगाय
त्रीचिदादित्यसंबोधिनी दीप्तीमनोवृत्तो सर्वज्ञसर्वदानुवर्तं अस्तीतित
त्पक्रांतं ।

ॐकारार्थं सर्वत्रप्रसिद्धं सर्वैरनुभूतंच चिदादित्योदेवस्य द्योतमा
नस्य सर्वोत्कृष्टस्य सर्ववंद्यस्य सर्वस्यास्ति प्रसिद्धस्य अंतर्या
मिरूपतया सकल चेतःप्रेरक धीप्रेरकस्य ब्रह्मणःपरब्रह्मणस्य
दत्वेन वरणीयं तेज नीयं निज प्रकाशात्म रूपमात्म तेन भा
वयामो नदेहादिषु आत्मा विमानं भजाम इत्यतस्तु मध्य
तेन सर्वमात्मत्वेन भावयेत् इत्युक्तंभवति मुनिदेवस्य वि
वर्तते नध्यायतो नजपतः स्याद्यस्या विधिपूर्वकम् एवमे
वधिवाभास स्तनुमोभक्ति पूर्णालिनम् ॐ भूर्भुवः स्वः सक
लं विश्वं विराड् तत्सर्वंगतं सर्वांतर्वर्तिच सवितुस्तेजोम
यस्य वरेण्यंवरणार्हं भक्तिगम्यंच भर्गः तेजः यत्प्रकाशे
न सर्वप्रकाशाः प्रकाशते देवस्य क्रीडनशीलस्य देवःप
रमात्मनः धीमहिध्यायामः धियः ज्ञानबुद्धिः यस्तेजः नो
स्माकं प्रचोदयात्प्रकटीकरोतु ॐ भूर्भुवः स्वः तत्सवितुरि
त्यर्थः

व स्य प्र स्य ज न व तु
रे धी चो सा र यो दे वि
णि म द व रो यो र्गो त्स
यं हि या हू प धि भ त

ॐश्रीगणेशायनमः ॐअस्मरस्मरदहंसवं
दितमभिमनवरविनतरणेनिरतं दर्शन
शातायुधभुजंगगणनतंगणपतिंवंदे १
वरवीरयोगिनीगणसिद्धावलिपूजितां
घ्रियुगलं अपहृतविनयिजनार्तिवटु
कमपानाभिधंवंदे २ योधीबलेनविश्व
भक्तानांशिवपथंभाति तमहमवधा
नरूपंसहतममलंसदावंदे ३ आत्मी
यविषयभोगैरिंद्रियदेव्यःसदाहृदंभो
जे अभिपूजयंतियंतंचिन्मयमानंदभै
रवंवंदे ४ उदयावभासचर्वणलीलावि
श्वस्यपाकरोत्यनिशं आनंदभैरवीतांवि
मर्शात्मपामहंवंदे ५ अर्चयतिभैरवंया
निश्चयकुसुमैःसुरेशपत्रस्था प्रणमामि
बुद्धिरूपांब्रह्माणींतामहंसततं ६ ऊ
हतेभैरवपूजामनलदलस्थाभिमानकु

स्त्रमैर्या नित्यमर्हस्कृतिरूपांवंदेनोशांभ
वीमंबां ७ विरद्दानिभैरवाचोंदद्दिणदल
गाविशेषबद्धस्त्रमैर्या नित्यमन्नःस्वरूपांको
मारीनामर्हवंदे ८ नैर्ऋतदलगाभैरव
मर्चयतेशाबृद्धस्त्रमैर्या प्रणमामिस्कृति
रूपांनित्यांनोवैसवीशक्तिं ९ पश्चिम
दिग्दलसंस्थाहृद्ध्यद्वैः स्पष्टोद्धस्त्रमैर्या
नोपूजयतिभैरवंतांवरूपधरांनमामिवा
राहीम् १० वरतरद्रूपविशेषैर्मास्तनदि
ग्दलनिषण्णस्रेहाया पूजयतिभैरवंतां
मिन्द्राणीहृष्टैर्वंदे ११ धनपतिकिस
लनिलयायानित्यंविविधबहुमाहावैः
पूजयतिभैरवंतांजिह्वाभिर्व्योनमा
मिचामुंडाम् १२ ईशदलस्थाभैरवम
र्चयतेपरिमलैर्विचित्रैर्या प्रणमामि
सर्वदानोब्राणाभिर्व्योमहालक्ष्मीं १३

शां॰
स्तो॰
९

षट्दर्शनेषु मज्जं षड्विंशान्तसंवलितं श्रा
त्माभिधं समनन्तं देवपतिं सिद्धिदं नौमि
संस्फुरत्स्वभवसारं सर्वान्तः सततसंनि
हितं नौमि महेशादि नमित्यं निजदेहग
देवताचक्रम् ॥५ इति श्रीदेहस्थदेवता
चक्रस्तोत्रं संपूर्णं समाप्तम् ॥ ॥
गंस्नातं तेन समस्ततीर्थसलिले सर्वाच
सर्वैव भूः पतितानां चक्रं तेन सहस्रमाविता
देवाश्च संतर्पिताः संसाराच्च समुद्धृताः
स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्य ब्रह्मवि
चारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥
प्रसन्नचित्तस्य महेश्वरस्य तिष्ठति प्रभुः शिवः शा
ङ्कुलमूलपूजनात् न कोटिसौवर्णजशोभा
पाचंनादमुद्गुन्ठेरपि वस्त्रैः पानैः ॥
धमशानमापद्देवं दृष्ट्वा कोऽत्र विरज्यते
नष्टे राज्यमिति श्रान्ते स्तनो यदभिजायते ॥

स्सैर्या नित्यमहं रूतिरूपां वंदे नोशांभ
वीमवो ७ विदशानिभैरवार्चितां दक्षिणदल
गाविशेषकृस्सैर्या नित्यमनःस्वरूपां कौ
मारीनामहं वंदे ८ नैऋतदलगाभैरव
मर्चयते शाकृस्सैर्या प्रणमामि सृष्टि
रूपां नित्यां नौवैसवीशक्तिं ९ पश्चिम
दिग्दलसंस्थात्रूपवद्रैः स्वर्णाकृस्सैर्या
नोपूयति भैरवं तां व्रतपधरां नमामि वा
राहीम् १० वरतरद्रवविशेषैर्मारुतदि
ग्दलनिषस्सेदृशाया पूजयति भैरवं तां
मिन्द्राणीं हंसं वंदे ११ धनपतिकिस
लनिलयायानित्यं विविधषडुसाहारैः
पूजयति भैरवं तां जिह्वाभिख्यां नमा
मि चामुण्डाम् १२ ईशदलस्था भैरवम
र्चयते परिमलैर्विचित्रैर्या प्रणमामि
सर्वदा तां ज्ञानाभिख्यां महालक्ष्मीं स्तु

षट्दर्शनेषु प्रजं षड्विंशान्तसंवलितं श्रा
त्माभित्वं सततं देवपत्निं सिद्धिदं नौमि
संस्फुरदनुभवसारं सर्वान्तः सततसंनि
हितं नौमि समरसैकनिम्यं निजदेहग
देवताचक्रम् ॥१५॥ इति श्रीदेहस्थदेवता
चक्रस्तोत्रं संपूर्णं समाप्तम् ॥ ॥
गंस्नातं तेन समस्ततीर्थसलिले सर्वाचा
सर्वैव भूर्यज्ञानां च कृतं सहस्रमखिला
देवाश्च संतर्पिताः संसाराच्च समुद्धृताः
स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्य ब्रह्मवि
चारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥
प्रसन्नचित्तस्य सदैव तुष्यति प्रभुः शिवः शा
श्वतमूलपूजनात् न कोटिसौवर्णऊशेषा
पार्चेनादपुष्टतुष्टैरपि वन्दनैः शतैः ॥
घनध्यानमापन्नं देवं दृष्ट्वा कोनुविरज्यते
नष्टैरागमिति श्रीमत्स्तोत्रं यदभिजायते ॥

ॐ श्रीदेव्यै नमः ॐ उषसि मागधमंगल॰
गायनैर्झटिति जागृहि जागृहि जागृहि
अतिकृपार्द्रकटाक्षनिरीक्षणैर्जगदिदं ज
गदंब सुखीकुरु १ कनकमयवितर्दिशो
भमाने दिशि दिशि पूर्णसुवर्णकुंभयुक्
ते मणिमयमंडपमध्यमेहि मातर्मयि
कृपयाशु समर्चनं गृहाण २ कनककल
शशोभमानशीर्षं जलधरचुंबि समुल्ल
सत्पताकं भगवति तव संनिवासहेतो
र्मणिमयमंदिरमेतदर्पयामि ३ तपनी
यमयी सतूलिका कमनीया मृदुलोत्तर
च्छदा नवरत्नविभूषिता मया शिबिके॰
यं जगदंब तेऽर्पिता ४ कनकमयवितर्दि
स्थापिते तूलिकाढ्ये विविधकुसुमकी
र्णे कोटिबालार्कवर्णे भगवति रमणीये
रत्नसिंहासनेऽस्मिन्नुपविश पदयुग्मं हेम

पीठेनिधेहि ५ मणिमौक्तिकनिर्मितेनमहांते
कनकस्तंभचतुष्टयेनयुक्तम् कमनीयतमं
भवानितुभ्यंनवमुल्लोचमहंसमर्पयामि ६
हृद्ययासरसिजान्वितविष्णुकांतयाचसहि
तेऽम्भसाद्यं पद्मयुग्मसदृशेपदयुग्मेपा
द्यमेतदुररीकुरुमातः ७ गंधपुष्पयवस
र्षपदूर्वासंयुतंतिलकुशाक्षतमिश्रम्
हेमपात्रनिहितंसहरत्नैरर्घ्यमेतदुररी
कुरुमातः ८ जलजद्युतिनाकरेणजातीफ
लकक्कोलकलवंगगंधयुक्तैः अमृतैरमृतै
रिवातिशीतैर्भगवत्याचमनंविधीयतां
निहितेकनकस्यसंपुटेपिहितेरत्नपिधा
नकेनयत् तदिदंमवनीकरेर्पितंमधु
पर्कजननिप्रगृह्यतां ९ एतच्चंपककेत
कमलविविधैःपुष्पैर्मुहुर्वासितंन्यस्तंरत्न
मयेसुवर्णचषकेभृंगैर्भ्रमच्छिद्रितं साने

हेमरसंस्तीभिरभिनोहसैर्हंनेतन्मयाकेश
शुभ्रमरघ्रभेशुमकलेंघ्रगेशुचालिप्यतां ११
मातः ॐॐमपकांनिर्मितनामिरंदेहेनवोद्धतं
नेमक्राहकलयामिहेमरजसामंमिश्रितं
केसरं केशानामलकैर्विशोध्यविनसल्क
स्त्रिकाघनितैः द्यानैर्नवरत्नॐभसहि
तंसवासितोमोदकैः ॥१२ दधिदुग्ध्यहृतैः
समाहितैः सितयाशर्करयासमन्वितैः
स्वपयामितवाहमाहतोजननानितोभुनरु
सवाशिभिः १३ पंलोशीरसुवासितैः सङ्ग
सुमैर्गगादितीर्थोदकैः मालिकाम्रनमो
क्षिकाम्रतमपैः सकेः सुवर्णोदकैः मंत्रा
नेदिकनाभिकान्विरिपठन्मानेद मन्याद
रान्स्नानतेपरिकल्पयामिजननिस्नानेन
मेमीउरु १४ वालार्कद्युतिदाडिमीयकुसु
मप्रस्पर्धिसर्वोत्तमंमातस्त्वंपरिधेहिदि(

मा॰
पू॰
११

ख्यवसनं भक्त्या मया कल्पितं मुक्तौघैर्ग्र
थितेन च कंचुकमिदं स्वीकृत्य पीनस्तनं
मस्वर्णसमानवर्णमतुलं प्रावारमंगी
कुरु १५ नवरत्नछनेन मयार्पिते कमनी
ये नवनीयपादुके सविलासमिदं पदद्व
यं कृपया देवि तयोर्निधीयतां १६ बहुभि
रगुरुधूपैः सादरं धूपयित्वा भगवति तव
केशान्कंकतैर्मार्जयामि सुरभिभिरवि
रैस्तुल्पैकेशांचंपयित्वा कुडिनि कनकस्र
जैर्जूटयेन ह्रयामि १७ सौवीरांजनमि
दं मंब चक्षुषोस्ते विन्यस्तं कनकशलाक
या मया यत्नं नूनमलिनमपि नवदीक्ष
संगाकुलेऽघभिन्नघलीयतामिवाय
मंजीरे पदयोर्निधाय रुचिरां विन्यस्य कां
चीं कटौ मुक्ताहारमुरोजयोरनुपमां नक्ष
त्रमालां गले केयूराणि भुजेषु रत्नवलय

श्रेणीकरेणुक्रमाम्राटकेनवकर्णयोर्विनि
र्दयेषुषीर्धचञ्चूगमलिम् १९ पंमिलेनव
देविदेहमञ्जुसमान्याथायभानस्मलेषुका
राजिविराजिहेमनिलकेनासापुटेमाक्ति
के मानमौक्तिकजालिकांचञ्चयोःस
वीणलीषमिंकाःकल्याकांचनकिंकि
णीविनिर्दये रत्नावनेसंस्थानौ २० मानभी
ननेनवातिविमलेकाश्मीरकस्तूरिका
कर्पूरागुरुभिःकरोमिनिलकेदेहेऽङ्ग
गंननः वेलाजालिषुयद्दकर्हेमरसंसि
क्ताचपुष्पजवेपालेक्षेत्रमनेपनादिभि
रहंसप्रजयामिक्रमात् २१ रत्नाद्दनेत्ला
वरिप्रजयामिषुक्तादत्तेवोहचिरैरविद्धैः
प्रवेडितेदेविपवादिभिर्वीकाश्मीरपंकां
कितनंदुसैर्वा २२ जनानिचम्पककेतकमि
हसुरोमभ्रमरसयमयपटवासकः सुरभि

गंधमिदं च चन्दनः समं सपदि सर्वमिदं परि
गृह्यतां २३ सीमंते ते भगवति मया साद
रं न्यस्तमेतत्सिंदूरं मे हृदयकमले हर्षव
र्षं तनोतु बालार्कस्य द्युतिरिव सदा लोहि
ता यस्य कांतिरंतर्ध्वांतं हरति सकलं चेतसा
चिंतयामि २४ मंदारकुंदकरवीरलवंग
पुष्पैस्त्वां देवि संततमहं परिपूजयामि जा
तीजपाबकुलचंपककेतकादिनानाविधा
नि कुसुमानि च तेर्पयामि २५ मालतीबकु
लहेमपुष्पिकाकांचनारकरवीरकेतकैः
कर्णिकारगिरिकर्णिकादिभिः पूजयामि ज
गदंब ते वपुः २६ पारिजातशतपत्रपाटलै
र्मल्लिकाबकुलचंपकादिभिः अंबुजादि
कुसुमैश्च सादरं पूजयामि जगदंब ते वपुः
लाक्षासंमिलितैः सिताभ्रसहितैः श्रीवास
संमिश्रितैः कर्पूराकलितैः सितामधुयुतैर्गो

सर्पिषालोडितैः श्रीखण्डागुरुकुङ्कुमप्रभृतिभि
र्नानाविधैर्वस्तुभिर्धूपैर्नैवेद्यकल्पयामि जग
नि धूपं त्वमङ्गीकुरु २८ रत्नालंकृतहेमपात्र
निहितैर्गोसर्पिषा संदीपितैर्दीपैर्दीर्घतरान्ध
कारभिद्भिर्बालार्ककोटिप्रभैः आत्तामाज्य
तज्ज्वलज्ज्वलनवर्तिप्रदीपैः सदा मातः
त्वामहमादराद्दुदितैर्नीराजयाम्युच्चकैः
महति कनकपात्रे स्थापयित्वा विशालान्स
मतसहशशपात्मको धूमसीमान् बहु
हुतमथ ते ऽग्नलदीपान्के पाभ्युवनजन
नि कुर्वे नित्यमारात्रिकान्ते २९ सविनयम
थदमानात्तपुष्पंधरित्र्यासमपहिद्विरसि
धृत्वा पात्रमारात्रिकस्य स्फुटकमलसमी
पेतं बसार्धं त्रिवारं भ्रमयति मयि भूयान्ते
कृपार्द्रः कटाक्षः ३० मानस्तोरधिकनयपा
पसमहाशाव्यवसननाभिकासम्माप्रपसि

मा॰
पू॰
१३

13

नाल्लुतैः सवडकैः सद्दोहरंभाफलैः ऐसाजी
रकह्लिंगुनागरनिश्राकोलुंभरीसंस्कृतैः शा
कैः साकमहंस्तथाधिकरसैः संतर्पयाम्यावि
के ३२ साम्रपमसपरधिद्रव्यमितान्हूनानि
सस्वाद्गभक्तपरमान्नपूरः सराणि धाको
लसन्मरिचनीरकवाद्भिकानिभव्यानि भुं
क्ष्वजगदेवसयार्पितानि ३३ दीरमेतदि
दमुत्रमोम्रसंप्राज्यमाज्यमिदमुज्ज्वलंमधु
मात्तरेनदमृतोपमंनयासंभ्रमेणपरिपी
पतांप्रभूः ३४ उम्मोदकैः पालिवृंगसुवेच
प्रहाल्यमानः कलधौतपात्रे कर्पूरमिश्रेल
मद्वैजमेणहसोसमुद्रतंपवंदनेन ३५
प्रतिप्रीतमस्वीरवासितंतपनीयपावपने
निवेदितं पटप्रतनमिदंजिनामृतंप्रचिरं
गाजलमेवपीयतां ३६ नामाम्रबाफल
संयुतानि द्राक्षाफलानि टससन्निनानि स

नारिकेलानि सदाडिमानि फलानि ते देवि स
मर्पयामि ९० कलिंदकोशातकसंयुतानि
नंबीरनारिंगसमन्वितानि सबीजपूराणि
सजांबवानि फलानि ते देवि समर्पयामि
कर्पूरेण युतैर्लवंगसहितैः कक्कोलचूर्णा
न्वितैः सस्वादुक्रमुकैः सगौरखदिरैः सुस्नि
ग्धजातीफलैः मातः केतकिपत्रपाण्डुरुचि
भिस्ताम्बूलवल्लीदलैः सानंदं मुखमंडनार्थ
मतुलं ताम्बूलमंगीकुरु ९१ एलालवंगा
दिसमन्वितानि कंकोलकर्पूरकमिश्रितानि
ताम्बूलवल्लीदलसंयुतानि पूगानि ते देवि स
मर्पयामि ९२ ताम्बूलवल्लिदलनिर्जितहेम
वर्णैः स्वर्णाक्रपूगफलमौक्तिकचूर्णयुक्तम्
रत्नस्थगीस्थितमिदं खदिरेण सार्धं ताम्बूल
मंब वदनांबुरुहे गृहाण ९३ ग्रथ्यवकुमणि
मिश्रमौक्तिकैस्त्वां विकीर्ये त्रिभुवनकमनीयैः

मा॰
पु॰
२४

14

मज्जयित्वाचवस्त्रैः मिलितविविधमुक्तांदिव्य
माणिक्ययुक्तांजननिकनकवृष्टिंदक्षिणांते
र्पयामि ४२ मातःकांचनदंडमंडितमिदं
पूर्णेन्दुबिंबप्रभंनानारत्नविशोभिहेमक
लशंलोकत्रयाह्लादकं भास्वन्मौक्तिकजा
लिकापरिवृतंप्रीत्यात्महस्तेधृतंछत्रंतेपरि
कल्पयामिशिरसित्वष्ट्रास्वयंनिर्मितम् ४३
शरदिन्दुमरीचिगौरवर्णैर्मणिमुक्ताविल
सत्सुवर्णदंडैः जगदंबविचित्रचामरैस्त्वा
महमानंदभरेणवीजयामि ४४ मार्तंड
मंडलनिभोजगदंबयोयंभक्त्यामयामणि
मयोमुकुरोर्पितस्ते पूर्णेन्दुबिंबरुचिरंवद
नंस्वकीयमस्मिन्विलोकयविलोलविलो
चनेत्वम् ४५ इंद्रादयोनतिनतैर्मुकुटप्र
दीपैर्नीराजयंतिसततंतवपादपीठम् त
स्मादहंतवसमस्तशरीरमेतन्नीराजयामि

जगदंबशिवेभवानि ४६ प्रियगानिरतिनं
गोरत्नपल्याणयुक्तः कनकमयविभूषः स्नि
ग्धगंभीरघोषः भगवतिकलितोयंवाह
नार्थंमयानेनरंगस्थलसमेतोवायुवेगस्तु
रंगः ४७ मधुकरवृतकुंभन्यस्तसिंधूररेणुः
कनककलितघंटः किंकिणीशोभिकंठः
श्रवणयुगलचंचच्चामरोमेघतुल्योननति
तवभुवेस्तान्मोतमानेनगएवएषः ४८ तु
रगरथगैर्विराजमानंमणिमयचक्रच
तुष्टयेनयुक्तं कनकमयमहंवितानवं
तंभगवतितेहिरथंसमर्पयामि ४९
शतपत्रयुतैः स्वभावशीतैरतिसौरभ्ययुतैः
परागपीतैः भ्रमरैर्मुखरीकृतैरनतैर्व्यज
नैस्त्वांजगदंबवीजयामि ५० परिखीकृत
सप्तसागरंबहुसंपत्सहितंमयावते विपु
लेधरणीतलाभिधंप्रबलंदुर्गमिदंसमर्पये

मा॰
पू॰
१५

15

ते ४१ हृदयस्थगजपरिक्षोभमाने दिशिदिशि
दुंदुभिर्मेघनादप्रजृंभे श्रुतिबहुचतुरंगसै
न्यमेनकप्रगवनिभक्तिभरेलतेर्पयामि ४१
मुखकमलनविलाससोललवेणीविलसितनि
जिंतलोलभृंगमाला: युवजनसुखकारि
चारुलीलाभगवतितेपुरतोनटंतिबाला:
भ्रमविलुलितलोलकुंतलालीविगलितमा
ल्यविकीर्णरंगभूमि: इयमतिरुचिरानटी
नटंतीतवहृदयेमुदमातनोतुमात: ४२
रुचिरकुचतटीनांनाट्यकालेनटीनां ४(
तिरहमथतत्त्वप्रत्यहंप्राडरास धिमिकि
धिमिकिहिंहिंहीनिधिंहीनिधिंहीधिगिनि
धिगिनितत्त्वेथ्येयथ्येयीतिशब्दा: ४४ भ्रम
दलिकुलवेणीलोलधम्मिल्लभारास्मितसु
खकमलोयद्दिव्यलावण्यपूर्णा श्रुतिपमल
मवेश्यावारयोषानटंतीपरभूतककंठीदे

विमोहनेनोत ५६ डमरुडिंडिमझंझरुणह
रीमृदङ्गरवाडंबराडंबरास्यः ऊर्डिनिर्केश
निभिर्गेनाटेविकेवरूरयेझटयेस्तवयेन
ने ५७ विपद्येष्वसमसनानादयेत्वस्तवहा
शिलायेतिगयर्वकन्याः दलगसावधानेन
चित्तेन मातः समाकर्णयत्वं मया प्रार्थिता
सि ५८ अभिनवकमनीयैर्नैनैनैर्नेकीनां
दलमपि रमधिना चित्रमेवत्वदीयं स्वय
महमपि चित्तैर्नेत्रवादित्रगीतैर्भगवतिभ
वदीयं मानसं रंजयामि ५९ तवदेविगुला
त्रुवर्णने चतुरानो चतुराननास्यः नहि
हेकमुखेष्वजेन्द्वस्तवनेकस्तवकर्त्तुमीश्व
रः ६० पदेपदेयः परिपूजकेभ्यः सद्योश्वमे
धादिफलंददाति तां सर्वपापेदयहंनुभु
नोग्रदक्षिणेनपरि नः करोमि ६१ रक्तोत्प
लारक्तलताप्रभाभ्यां ध्वजोर्ध्वरेखाकुलिशांक

मा
पू.
२६

16

किताभ्यां श्रुत्योत्तंसारकवंदिताभ्यां नमो भ
वानीपदपंकजाभ्याम् ॥२३॥ चरणनलिनयु
गंमपंकजैः प्रजयित्वा कनककमलमालां कं
ठदेशेर्पयित्वा शिरसि विनिहितोयं रत्नपु
ष्पांजलिस्ते हृदयकमलमध्ये देवि मोदेन
नोत्थ ॥२४॥ रत्नमणिमयमंचकाभिरामे
द्युतिमतिपुष्पवितानराजमाने प्रसरद
गुरुधूमधूपितेस्मिन्भगवति वासगृहे स्व
नेनिवासः ॥२५॥ एतस्मिन्मणिविचित्रसुव
र्णपीठे त्रैलोक्याभयवरदौ निधाय पादौ
विस्तीर्णे मृदुलतरोत्तरच्छदेस्मिन्पर्यंकेक
नकमये निषीदमातः ॥२६॥ तव देवि सरो
जचिह्नयोः पदयोर्निर्जितपद्मरागयोः
प्रतिरक्ततरैरलक्तकैः पुनरुक्तां रचयामि रक्त
तां ॥२७॥ अतिशीतमुशीरवासितेनिजलेनाम्बु
लरसेन रंजिते नवनीयमये हि पात्रके मु

त्वं गंगूबजले निधीयतां ४७ इतमयज
गरंब्रमेवकेस्मिन्मडतरत्नलिकयाविग
नमाने प्रतिरुहसिमद्राशिवेनसार्थसु
त्वंशयनेऊहमाइरिस्मरंतो ४८ पुष्पाकै
दैडगौरोमणिमयमुकुटोरत्नताटंकयुक्ता
मदस्ववक्षहस्तामभयवरकरांबेरवृ
ंगत्रिनेत्राम् नानालंकारयुक्तांसरसकुट
मणिधानिनेत्वणिपीठांमानसेसस्प्रसन्नां
त्रिभुवनजननींचेतसाचिंतयामि ४९ ए
षाभक्त्यातवविरचितायामयादेविपूजा
स्वीकृत्वैनांसपदिसकलान्मेपराधान्क्षम
स्व न्यूनंयत्तत्तवकरुणयापूर्णतामेतुमातः
सानंदोमेहृदयकमलेतेस्तुनित्यंनिवासः ॥
पूजामिमांपठेत्प्रातःपूजांकर्तुमनीश्वरः
पूजाफलमवाप्नोतिवांछितार्थंचविंदति
प्रत्यहंभक्तिसंयुक्तोयःपूजनमिदंपठेत्

वारेष्वास्तु प्रसादेन वत्सरात्मकविर्भवेत
इति श्रीपरमहंसपरिव्राजकश्रीमच्छंक
राचार्यविरचितं चतुःषष्ट्युपचारमानसि
कपूजास्तोत्रं संपूर्णमस्तु ॥ ॥

गैं श्रीगणाधिपतयेनमः गैं अजपानामगा
यत्री योगिनां मोक्षदायिनी अस्याः संकल्प
मात्रेणनरः पापैः प्रमुच्यते ॐ उत्तिन्याः सर्व
भूतानांगायत्री प्राणवाहिनी प्राणवायानथा
विद्यायस्तंवेदसवेदवित् षट्शतानिदि
वारात्रौसहस्राण्येकविंशतिः हंसहंसेति
मंत्रेणजीवोजपतिसर्वदा षड्भिः श्वासैर्भ
वेत्प्राणः षड्भिः प्राणैर्घटीस्मृतः तासांषष्टि
रहोरात्रंजीवसंख्याप्रमाणतः हकारेणब
हिर्यातिसकारेणविशेत्पुनः हंसहंसे(
तियंमंत्रंजीवोजपतिनित्यशः षट्शता
निगणेशस्य षट्सहस्रंप्रजापतेः षट्सह
स्रंगदापाणेः षट्सहस्रंपिनाकिनः सहस्र
मात्मनेतेयंसहस्रंगुरवेप्रियेन सहस्रंप
रमात्मनेविनियोगः प्रकीर्तितः आधारेतु
स्ववर्णेचस्वाधिष्ठानेतुलिंगके मणिनाभि

अं. गा. १८

18

गतंषोडंहृदयेचाप्यनाहतं विशुद्धकं
ठदेशेतुभ्रुवोमध्येतुख्यातिकं चक्रभेद
मिदंप्रोक्तंचक्रातीतनमोस्तुते आधारे
लिंगनाभौहृदयसरसिजेनालमूलेल
लाटेद्विछत्रेषोडशारेद्विदशशतदले
ठारद्वार्पंचतत्वे वामांतेबालमध्येडफ
कठसहितेग्रःविसर्गेचहद्देनमध्येहंस
रूपंसकलदलगतंदीपरूपंनमामि
ॐअस्यश्रीअजपागायत्रीमंत्रस्य हंसऋ
षिः परमात्मादेवता अव्यक्तगायत्रीछंद
दः हंबीजं सःशक्तिः सोहंकीलकं धर्मा
र्थकाममोक्षार्थेजपेविनियोगः ॐहंस
ऋषयेनमःशिरसि अव्यक्तगायत्रीछंद
सेनमोमुखे परमात्मादेवतायैनमोहृदि
हंबीजायनमोगुह्ये सःशक्तयेनमःपाद
योः सोहंकीलकायनमोनाभौ धर्मार्थका

ममाद्दार्थे जपे विनियोगः सर्वात्मने ॐ अ
र्घात्मने अंगुष्ठाभ्यां नमः ॐ सोमात्मने त
र्जनीभ्यां स्वाहा ॐ निरंजनात्मने मध्यमा
भ्यां वषट् ॐ निराभासात्मने अनामिका
भ्यां हुम् ॐ धर्मात्मने कनिष्ठिकाभ्यां वौ
षट् ॐ ज्ञानात्मने करतलपृष्ठाभ्यां फट्
इति करन्यासः एवं षडंगन्यासः तदनंत
रं मूलमंत्रं वारत्रयं ठाद्दश ॐकारं ठाद
शांतादवतार्य यथाविधि ध्यानसंकल्प
कृत्वा ॐ तत्र आधारचक्रे चतुर्दलकमले
वंधकंऊँसमवर्णसहस्राकर्णिकायां वे
षे संनन्मये मषकारं ठरक्तवर्णसह
स्रार्णप्रवामांगशक्तिसहितं पाशांकु
श मोदकपात्रधरं वेदाधिपतये गणऊँग
णेशाय षट्शतानि वदयामि नमः १ ॐ
स्वाधिष्ठानचक्रे षट्दलकमले कान कव

ग्रं॰ गा॰ २९

9

लिसहस्राकर्णिकायां बं भं मं यं रं लं तन्मध्ये
हेमाद्रठचतुराननवामाङ्गस्थशक्तिसहिता
हंसासनकमण्डलुस्रुचधारिणं लोकाधिप
तये ब्रह्मणे षट्सहस्रं निवेदयामि नमः
तृतीये मणिपूरकचक्रे दशदलकमले र
क्तनीलसहस्राकर्णिकायां डं ढं णं तं थं दं धं
नं पं फं तन्मध्ये गरुडारूढानसीकृष्णसका
शं शङ्खचक्रगदापद्मधारिणं प्राणाधिप
तये विष्णवे षट्सहस्रं निवेदयामि नमः
ध्वनाहतचक्रे द्वादशदलकमले श्वेतव
र्णसहस्राकर्णिकायां कं खं गं घं ङं चं छं
जं झं ञं टं ठं तन्मध्ये वृषभारूढं उमास
मवरधारिणं भूताधिपतये श्रीरुद्राय ष
ट्सहस्रं निवेदयामि नमः ५ विशुद्धच
क्रे षोडशदलकमले चन्द्राभं सहस्राक
र्णिकायां अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं

ॐ श्रं श्रंः तन्मध्ये आत्मचित्रमणिस्फुलज्ज्वाल
सीवर्षिलोकारप्रकाशसोमात्मनेइडिया
रिपतयेएकसहस्रंनिवेदयामिनमः ४
अनाहतेकोटिदलकमलेगाढीरवलीसह
स्रकर्णिकायां हं हंः तन्मध्ये सर्वदेवनाधि
पतयेएकसहस्रंनिवेदयामिनमः ६
ब्रह्मरंध्रेसहस्रदलकमलेविद्युत्कोटिस
हस्राभकर्णिकायां तन्मध्ये हंसः ॐ नमः
शिवायेतिबीजेग्रहहरमस्रावाक्यविचा
रेणजीवात्मपरमात्मनोरैक्यंकृत्वा पर
मात्मनेमोक्षाधिपतयेएकसहस्रंनिवेद
यामिनमः ७ आधाराद्यर्धनेधैर्यस्वाधिष्ठा
नादतेजिता मणिपूरात्मसावीर्यंप्रहस्व
यमनाहते विशुद्धचक्राद्याष्टहिःशरीर
स्यापिरोगता अनाहतचक्राद्द्वादशहिर्वहि
रेनविचारिणी शुभाशुभपरिज्ञानसर्वस

श्र॰ गा॰ २०

८०

त्वमेकला ब्रह्मरंध्रे महाचक्रे लीनं तं प
रमात्मनि। इत्थमेवं विज्ञाते जीवात्मा प
रमात्मनि स एव मुच्यते ऽस्माद्घोरसंसार
बंधनात् आज्ञेचक्रमाधारात् स्वाधिष्ठानात्म
दागजीकर्म मणिपूरकाच्चनवलीपाल्हो(
लासोप्यनाहतचक्रात् संविसर्गकाश्चत
याध्यानानीतात्मरहिष्टित्रु नथाचविशुद्ध
चक्राद्रुहस्रमादेन लंपिकाभ्यासः हिपद्मा
ताचक्राच्चवनिसननं विंदुस्फोनेरमं प्रा(
णाभ्यासः स्वचक्रान्नीस्वचक्रान्नीतं नत्वमामोति
अनाहतपदे लीने धामसंबद्धसंपुटे कृत्वा
प्रवेशयेज्जीवं पतितात्मादुलाहकं तत्र(
स्थाने स्थितं वह्नुरुडीकारात्मनरोचितं सं(
स्मरेन्मेत्रमतुलं स्वधात्रस्वमनाहतं तत्
णात्करुनेत्रपंसेक्षादिव्यासमनोमितं पिंड
संचपदस्थं चत्रपसंत्रपवर्जितं प्रवेशय

पंरेहे हविर्गमेवापहारकं इत्याणं कृतनेत्र
पंचतत्त्वभोगेगणेविकां यथत्स्मीह तेत्त्वपं
ष्मृतेसहसंस्त्रभाणुभे जलेतत्त्व नतत्त्वपस्या
स्यतेत्वस्यत्तत्त्वपकं पार्थिवेपार्थिवं तत्त्वपंच
तत्त्वपंचमथ्यगे एवं बहुविधं तत्त्वपं स्वेक्षयास
चराचरम् क्रीडते साधकः श्रीमान्सत्यं भै
रवभाषितं ॥ इतिश्री अजपागायत्रीस
माप्तम् ॥ ॐ श्रीगणेशाय नमः ॥
ॐ हरेशानवरंधमाद्वदयमोवास्तर्गणे
षोमनः शान्तावातरवः समीरदक्षकेन्वा
धारणात्मकं विहेवोद्यविमर्शशक्ति
महितेषानुल्पमंगावतिलोके प्राः कर
णानियस्यमहिमानंनेत्रनाद्यंस्तुमः १

श्र॰
गा॰
२१

ॐ नमो गुरवे सरस्वतीरूपाय ॐ विद्यात्मि
कां तज्जननीं तां हृदयं परमेशितुः पराशि
क्तिरूपेण स्फुरंतीं संविदं नुमः ॥ इह खलु प
रमेश्वरः प्रकाशात्मा प्रकाशस्य विमर्शस्व
भावः विमर्शो हि नाम विश्वाकारेण विश्व
प्रकाशेन विश्वसंहारेण वा अकृत्रिमाहमि
ति विस्फुरणं यदि निर्विमर्शः स्यादनीश्व
रो जडश्च प्रसज्येत एष एव च विमर्शः चिते
सत्तानी चैतं चिद्धेन न्यं स्वरसोदिता परा वा
क्स्वातंत्र्यं परमात्मनो मुख्यमैश्वर्यं कर्तृत्वं
स्फुरत्ता सारो हृदयं स्पंद इत्यादिशब्दैराग
मेषूद्घोष्यते अत एवाकृत्रिमाहमिति मन
नः स्वयंप्रकाशरूपः पारमेश्वर्यात् शि
वादिधरण्यंतजगदात्मना स्फुरति प्रकाश
ते जगतः कर्तृत्वेनाजडत्वं च जगतः कार्यत्व
मप्येतदधीनप्रकाशत्वमेव एवंभूते जग

त्प्रकाशरूपात्मकं हि महेश्वरादभिन्नमेव भिन्नवे
द्यप्रकाशमानत्वेन प्रकाशनयोगान्न किंचि
त्स्यात् अनेनच जगतोस्य भगवतः प्रकाशा
त्मकं रूपं न कदाचिन्निरोधीयते एतत्प्रका
शेनेन प्रतिष्ठां लब्ध्वा प्रकाशमानमिदं जग
दात्मनः प्राणभूतं कथं निरोद्धुं शक्नुयात्
कथं न विरुध्यस्वयमेव निष्ठेत अतश्चास्य
वस्तुनः साधकमिदं बाधकमिदं प्रमाणमि
त्यनुसंधानात्मकसाधकबाधकप्रमातृत्वप
तया चास्य सद्भावः न तस्याभावे किं प्रमाणमि
ति वक्तुं सद्भावमन्तरमन्य नाहक्वभावे किं
प्रमाणमिति निष्टष्टरूपतयावश्यं सिद्धस्व
महेश्वरस्य स्वयं प्रकाशत्वेन सर्वस्य संवेदन
सिद्धम् किंच प्रमाणमपि यमाश्रित्य प्रमा
णं भवति तस्य प्रमाणस्य तदधीनशरीर
प्राणनीतस्वतोदिवेद्यचानिशस्य सदा

भासमानस्यवेद्यवैकल्यरूपस्यसर्वप्रमितिभाजः
सिद्धावभिनवार्थप्रकाशस्यप्रमातृवराक
स्यकस्योपयोगः एवंचशक्तिराशिमयपरमा
हन्तापरामर्शसारत्वात्परमशिवएवषट्त्रिं
शत्तत्त्वात्मकःप्रपंचः शिवशक्तिसदाशि
वईश्वरशुद्धविद्यामायाकला।विद्यारागका
लनियतिपुरुषप्रकृतिबुद्ध्यहंकारमनःश्रो
त्रत्वक्चक्षुःजिह्वाघ्राणवाक्पाणिपादपायूप
स्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्नि
सलिलभूमयः एतानिषट्त्रिंशत्तत्त्वानि
तत्रशिवतत्त्वंनाम इच्छाज्ञानक्रियात्मककेवल
वलपूर्णानंदस्वभावरूपपरमशिवएवप्र
स्वजगत्सृष्टिमिच्छोपरिगृहीनवतःपरमे
श्वरस्यप्रथमस्पंदएवेच्छाशक्तितत्त्वम् प्र
तिहतेच्छात्वात्मदैवांकुरायमाणमिदंज
गत्स्वात्मनाहंतयाच्छाद्यस्थितंतद्रूपंसदाशि

वतत्वम् संकुचितेजगदहंतायां तुल्यस्मिन
मीश्वरतत्वे अहंतेदंतयोरैक्यप्रतिपत्तिः शु
द्धविद्या स्वस्वरूपेषु भावेषु भेदप्रथा माया
यदा तु परमेश्वरः परमेश्वर्या मायाशक्त्या
स्वरूपं गूहयित्वा संकुचितग्राह्यग्राहक
तामश्नुते तदा पुरुषसंज्ञितः प्रथमेव मा
यामोहितः कर्मबंधनः संसारी परमेश्वरा
दभिन्नोप्यस्मोहः परमेश्वरस्वभावेन
इंद्रजालमिवेंद्रजालिकस्येच्छया संपा
दितभ्रांतेर्भ्रांत एव विद्याभिज्ञातैश्वर्येस्व
चिद्घनो मुक्तः परमशिव एव ॥ अस्य सर्वक
र्तृत्वसर्वज्ञत्वपूर्णत्वनित्यत्वव्यापकत्वश
क्तयः संकुचिताऽपि संकोचग्रहणेन क
लाविद्यारागकालनियतिरूपतया भवंति
तत्र कला नामास्य पुरुषस्य किंचित्कर्तृत्वे हे
तुः विद्या किंचिज्ज्ञत्वकारणं रागो विषये

षभिषंगः कालोहिभावानांभावाभावसन्ता
नानांक्रमोवृद्धेदकःप्रनादेः नियतिर्यमेदक
नैवमितिनियमहेतुः एतन्नंचकमस्यसत्र
पावारकत्वात्कंचुकमितिचोच्यते महदादिपृ
थ्व्यंतानांतत्वानांमूलकारणंप्रकृतिः एषा
चसत्वरजस्तमसांसाम्यावस्थाअविभक्तरूपं
अहंकारोममेदंनममेदमित्यभिमानसाधन
म् मनःसंकल्पसाधनं बुद्धिर्निश्चयसाधनं
एतत्त्रयमंतःकरणं शब्दस्पर्शरूपरसगंधा
त्मकानांविषयाणांक्रमेणग्रहणसाधनानि
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानिपंचज्ञानेंद्रिया
णि वचनादानविहरणविसर्गानंदात्मक्रि
यासाधनानिपरिपाट्यावाक्पाणिपादपायू
पस्थाःपंचकर्मेंद्रियाणि शब्दस्पर्शरूपरस
गंधाःसामान्याकाराःपंचतंमात्राणि आका
शमवकाशप्रदं वायुःसंजीवने अग्निर्दाह

कः पावकश्च सलिलमाप्यायके भूमिर्धारका
यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः त
था हृदयबीजस्थं जगदेतच्चराचरं इति परा
भट्टारिकारूपे हृदयबीजेनर्भूते कथं यथा
त्वं भावकाशादीनां महिकारणं पारमा
र्थिकं रूपं मृदेव भवति तथा पृथिव्यादिमा
यान्तानां तत्त्वमनत्वमीमांस्यमाने सदसत्येव
भवेत् शुद्धस्यापि पदस्य निरूप्यमाणं धात्वर्थ
येन केप्रत्ययांशो विसृज्य प्रकृतिमात्ररूपं स
कारमात्रमेवावशिष्यते तदंतर्गतमेकत्रिंश
त्तत्त्वम् ततः परं शुद्धविद्येश्वरसदाशिवत
त्त्वानि ज्ञानक्रियासारतालिशक्तिविशेषत्वा
दैकारेश्वपगमरूपे तत्र शक्तिमयेनर्भूता
नि अतः परमधीयः स्फुरद्रूपो विसर्जनीयः
एवंभूतस्य हृदयबीजस्य महामंत्रात्मको
विश्वमयो विश्वोत्तीर्णः परमशिव एव उदय

प. प्रा. १५

24

विश्रांतिस्थानत्वात् निजस्वभावः इहप्ररू
ढबीजे यो वेद स समाविष्टनिच स परमार्थतो
दीक्षितः प्राणाद्याचारयं लौकिकवद्वर्तमानो
जीवन्मुक्त एव देहपाते श्रीपरमभट्टारक
एव भवति ॥ इति श्रीपराप्रावेशिका स
माप्ता ॥ ॐ श्वासः प्राकृतपयाति प्राकृते
नभिवर्तते तेनः स्वपरमाकाशे जीवपाशा
च्छिमुच्यते प्राकृतानीते परे व्योम्नि लभते शा
श्वतं पदं ब्रह्मांडं पंचभूतस्थं पंचभूतमयी
तनुः सर्वभूतमयी चेति त्यक्त्वा नास्तीति भा
वयेत् न किंचिन्मनसा ध्यायेत् सर्वचिंतावि
वर्जितः सबाह्याभ्यंतरं योगी जायते तन्मुं
मुक्तः तन्मयसमुद्रे जाते तन्मनस्कं प्रजाय
ते अमनस्केपि संजाते चिंतादिविलयो भ
वेत् मनःपवनयोर्नाशादिंद्रियार्थं विमुं
चति इंद्रियार्थी यदा मुक्तो बाह्यतानेनजा

यते बाह्यज्ञाने विनष्टे च ततः सर्वसमो भवे-
त् यदा सर्वसमो जातः सम्भवेत्पारवर्जितः
परब्रह्मणि संबोधे योगी आप्नोतयस्तदा स-
दाभ्यासरतानां च यः परो जायते लयः तस्मा-
द्रकथयिष्यामि तद्दत्तं शुक्रचेतसा श्रवे-
दः त्वं नजानानि श्रीनामं च नविंदति विचा-
रं वैंद्रियार्थानां नवेत्ती ह लयगतः न च जीव-
न्मृतो वापि न पश्यति न मीलति निर्जीवः
काष्ठवत्तिष्ठेल्लयस्याचाभिधीयते ॥ प्रा-
भवी १ इच्छा २ ज्ञान ३ क्रिया ४ विक्रम-
क्रमयोगेन क्रियाशक्तिर्निगद्यते १ बिंदु-
नादद्वयं कलामध्ये वा चेतनाकृतिः ज्ञाना-
ख्या शक्तिबोधिन्या शक्तिस्त्वं च निगद्यते २
यस्मिन्नारंभ क्षितौ ज्ञानमासृजते च निरामये
इच्छाशक्तिस्तु विज्ञेया शक्तिः साक्षाद्गुसारि-
णी ३ तत्र निष्क्रम्य देहस्य केवल्यस्य विद

प॰
प्रा॰
२१

25

त्मनः पञ्चोदेति महानंदः साधाक्षिः शोभवीक
ता ॥ ॐ अथ भूमिकासप्त ॥ ॐ ज्ञानभूमिः
शुभेच्छाख्या प्रथमा परिकीर्त्तिता विचारणा
द्वितीया स्यात्तृतीया तनुमानसा सत्त्वापत्तिश्च
तुर्थी स्यात्ततोसंसक्तिनामिकाः पदार्थाभावि
नी षष्ठी सप्तमी तुर्यगा स्मृता ॥ तत्र नित्यानि
त्यवस्तुविवेकादिपुरःसरा फलपर्यवसायि
नी मोक्षेच्छा नाम प्रथमा १ ततो गुरुमुपेत्य
वेदांतवाक्यविचारः श्रवणमननात्मको द्वि
तीया २ ॐ ततो निदिध्यासनाभ्यासेन मनस
मेकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं तृती
या ३ ॐ ततः परमशिवाद्वैतसाक्षात्करणं
चतुर्थी ४ इयमेव फलत्रयापेक्षसंसक्ताया
स्तिसृष्वविशेषाः ॥ आद्यास्तिसृषु जा
ग्रदवस्थात्वं द्वैतस्य भेदेनावभासात् ॥ च
तुर्थी पुनः स्वप्नावस्था जगतो मिथ्यात्वभा॰

सात् निर्विकल्पसमाध्यवस्थालक्षणाभ्रंस
भिःस्तब्धिः पुनःस्वयमेव क्षुभितो भवति
योगी ततस्तदभ्यासपरिपाकेनयाचिरका
लावस्थायिनी सापरा यो भाविनी गाढस्तब्
धिः पुनः परप्रयत्नेन क्षुभ्यते यस्यामवस्था
यां न स्वतो न वा परतो क्षुभितो भवति भेदा
भासस्यात्यंतमनवभासात् किंतु सर्वथा स
र्वत्र सर्वदा परमेश्वरमय एव परिपूर्णे पर
मानंदघन एव सर्वदा निवृत्तिर्या सा सप्त
मी ॥७॥ इतिज्ञानभूमिकाक्रमः ॥ शिव,
मंत्र मंत्रेश मंत्रमहेश विज्ञानाकल प्रल
याकल सकल ७ भेद एक एव भैरवो नाथः प्रो
क्तसप्तिरूपकः एकः शिवादि सकल प
र्यंत स्थितिसंगतः सोयं समस्त एवाधाभैर
वाभेदवृत्तिमान् तत्तानेकात्मता तत्त्वमप्य
वानोवभासते २ सोयमानंदरूपस्तामंत्रा

मं.
२९
76

ध्येति विभाव्यते प्रमातृपदतया सोयं वर्णो ध्येति
निरुच्यते ३ प्रमाणतृपतामेत्य श्रयात्वे षपदा
ध्येतो प्रमाणतृपतावेशमपरित्यज्य मेयतो
गच्छन्संकलनायोगात्कलाधामानुसंगतः श्रु
द्धप्रमेयतायोगे मतन्त्राध्येति शब्द्यतां तन्त्रेष्वा१
स्याधारतायोगाद्भुवनाध्येति वर्णितः ॥
निजानंदः निरानंदः परानंदः ३ महानंदः
चिदानंदः ५ जगदानंदः ६ येनिजानंदः प्र
मात्रंशमात्रनिष्ठनिबंधनः शून्यतामात्रवि
श्रांतेर्निरानंदात्मिकास्थितिः १ प्रमेयपद
विश्रांतेः परानंदः भुवेत्वतं ब्रनंतमेयसंब
द्धप्राणेमेयेनसर्वतः २ प्रमाणत्त्वैवणायोगा
न्महानंदइतिस्थितिः प्रमातासर्वमेयोघक
लनाग्रासकोविदः ३ यदाविश्रांतिमभ्ये१
तिनिरुपाधिस्वनिर्भरो तदावित्तचिदानंदो
योजगत्रयबृंहितः ४ नचतत्रस्थितिःकापि

विभक्ताजडङ्गपित्ती पञ्चकोपिव्यवच्छेदोना
स्तियद्विद्यतः स्फुरत् ४ यदनादृतसंविक्तिः
परमामृतहृंह्नितं तदेवजगदानंदधामा१
स्माकंगुरुजैगो ॥ इतिश्रीआचार्याभिनव
गुप्तगरवोमालिनीवार्त्तिके ॥ तथातत्रैव
ईशानाय तत्पुरुषाय अघोराय वामदेवा
य सद्योजाताय ॥ येनस्फुरत्येषशक्तिर्या
पूर्वमासीदभेदिनी भावोन्मेषस्वरूपासोया
तानन्दरूपषष्ठिर्नि: १ यदभित्रेतदृग्याह्यंय
च्छायाहृकमीष्टरं प्रधुनानत्स्विनिग्राह्यंभे
दानन्दाहृकंभिदः २ तत्पुरुषात्व्येयतः योक्ते
स्दृष्टाघोरभेयागतः सस्फुटयत्यभितानान्त्र
विवक्षेवभण्यते ३ जानोपिभेदतन्मात्रेसं
कोचेयद्रूपागतः यतोव्यतिनिमीलतेतेभो
क्तभोग्यविवृहस्फुटं ४ अजातमिवतादृग्य
मत्रसद्योवभासते सद्योजातपदंतेनस्मृत्या१

गे.
२२

27

संवेदनात्मके ५ अनन्तसद्योजातेस्मिन्नुत्था
नैरुद्रघ्नात्मिना मातृसंकोचरूपायि चिद्धि
कासे भविष्यति ६ यत्रीनाब्रह्मविस्पृशीतेना
यःकृतेवलान् वस्तुभावमयीत्यादिदृशा
तत्तादिदेवता ७ तस्माद्बोधभैरवात्मविम्
छायपरिस्थिते चिदनुशालिनोविश्वहासना
नेरसंहरौ ८ चिदेकवपुषाविश्वं सचिकीर्षं
चिदात्मनि स्वबोधशक्तिवमनात्मदेवोवाम
उच्यते ९ ॥ सैवामयासृज्यते विश्वंस्वेच्छ
यापात्यतेपुनः सैवाकालोपसंहारेक्रियते
स्वेच्छया प्रभुः १ कालाकलनिभूतानि विकि
रिणाकिरेनुनः कलमप्यन्वयासर्वबलेमथ्या
निचान्वया २ दमयित्वादमयित्वानमनःसं
कल्परूपया नयतेपरमंस्थानंउन्मन्यापरमे
श्वरः ३ इतिनिरुक्तिः विकरणेयति कलविक
रणाकलाः शक्तीर्विकरेन्सर्वसमाश्रयाधिष्ठिते

करोति अन्यथा बलविकिरणात्सर्वत्र बलेन स्व
व्यापारकरणसामर्थ्यं च विकिरेत् अन्यथाव
लम्बमध्यिन्यासर्वेषां हृदि ईश्वरस्तानाबलेन भ्रम
यति ॥ जाग्रत् स्वप्न सुषुप्ति तुर्या तुर्या
तीत ५ गेयद्रूपं तभने बाह्यान्विषयाकार
तैः क्रमात् जाग्रत्प्रसराजाग्रदवस्थास्थाय
मुच्यते १ निरिन्द्रियप्रदेशात् एकस्य मनसः
स्थितिः यदा भवति जीवस्य स्वप्नावस्थेयमु
च्यते २ मनोवृत्तिमतिक्रम्य स्वसंवेदनेन प
रं बुद्ध्या चेतनं जीवो सौ सुषुप्तिः सा निगद्यते
यत्र बुद्धेर्लयादात्मसंवेदनं निस्तत्त्वतः जी
वात्मनोरभेदात्तुर्यावस्थेयमुच्यते ४
